र्प्यंपीतवासःश्वेताश्वःकृष्णागौःकालायसंहस्तीछागोवेतिग्रहक्रमेण ॥ अत्रन्यूनंदक्षिणाबुधदक्षिणया

हिरण्येनसमाकार्याआद्यगवावाएतदभावेसर्वेभ्योयथाशक्तिहिरण्यंवाददद्यात् ॥ आचार्यायद्विगुणं ॥ अ

न्येभ्यश्चयथाशक्तिभूयसी ॥ ततःकांस्यपात्रगताज्ये ॥ रूपंरूपंप्रतिरूपोबभूवेतिमंत्रेणसकुटुंबःस्वप्रति

रूपंप्रेक्ष्य ॥ आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंस्मृतं ॥ आज्यंसुराणामाहारआज्येदेवाःप्रतिष्ठिताः ॥ इ

तिमंत्रंपठित्वातदाज्यंसदक्षिणंब्राह्मणायदद्यात् ॥ ततोभूरिदक्षिणांदत्वासंकल्प्यवा ॥ एकस्यआहुतेरेकं

शतस्यैकंसहस्रस्यवाएकंयथाशक्तिवाब्राह्मणान्भोजयित्वातेभ्यःशांतिःपुष्टिस्तुष्टिश्च।स्वस्त्याद्या।शिषोगृ

हीत्वातान्संप्रार्थ्यप्रणिपत्य ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु ॥ न्यूनंसंपूर्णतांयातुसद्योवंदे

तमच्युतमितिपठित्वा ॥ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णस्यादिति

श्रुतिः ॥ इत्युक्त्वान्यूनातिरिक्तच्छिद्रत्वार्थंयथाशक्तिअच्युतानंतगोविंदेतिनाममंत्रजपंकृत्वाग्रहयज्ञफलं

श्रीविष्णवेसमर्प्यस्वयंहृष्टमनाबंधुभिःसहभुंजीत ॥ अयंचाश्वलायनगृह्यपरिशिष्टोक्तोग्रहमखः ॥

स्मार्ताग्निमतामाश्वलायनानामेव ॥ बह्वल्पंवास्वगृह्योक्तंयस्यकर्मप्रचोदितं ॥ तस्यतावतिशास्त्रार्थेकृते

सर्वःकृतोभवेदितिवचनात् ॥ एवमन्येषामपियदिस्वगृह्यादावुक्तःतदासएव ॥ येषांतुस्वगृह्यादौनोक्तः

स्तेषांयाज्ञवल्क्यादिस्मृत्युक्तः ॥ मत्स्यपुराणाद्युक्तोवानुष्ठेयःस्मृत्यादेःसाधारण्यादितिदिक् ॥ ॥ इ
तिसमंत्रक नवग्रह मखप्रयोगः समाप्तः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ १०५ ॥ ॥ अथ यतेःसमाराधन विधि प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अथयतेःसमाराधनविधिप्रारंभः ॥ तत्प्रयोगः ॥ देशकालौस्मृत्वाश्रीना
रायणप्रीत्यर्थंसमाराधनंकरिष्ये ॥ इतिसंकल्प्य ॥ गुर्वर्थेक्षणःकर्तव्यः ॥ एवंपरमगुर्वर्थंपरमेष्ठिगुर्वर्थे
परात्परगुर्वर्थेएवंविप्रचतुष्टयंनिमंत्र्यशुक्लेकेशवादिनामभिःकृष्णेसंकर्षणादिनामभिःद्वादशविप्रान्निमंत्रये
त् ॥ एवंषोडशविप्राःयतयोवाअशक्तोयथाशक्तिविप्रान्निमंत्र्ययथायथंषोडशक्षणादेयाः ॥ षोड
शानांपादक्षालनंकृत्वाचम्यपादक्षालनोदकंपात्रांतरेगृहीत्वागंधपुष्पादिभिःपूजयेत् ॥ विप्रान्प्राङ्मुखानु
दङ्मुखान्वोपवेश्यषोडशोपचारैःगंधादिपंचोपचारैर्वासंपूज्यसपरिकरमन्नंपरिविष्यगायत्र्याप्रोक्ष्यगुरवे
इदमन्नंपरिविष्टंपरिवेक्ष्यमाणंचातृप्तेःस्वाहाहव्यंनममएवंपरमगुर्वादिभ्यःपंचदशभ्योन्नत्यागंकृत्वा।ब्रह्मा
र्पणमित्यादिभुक्तेष्वाचांतेषुतांबूलदक्षिणावस्त्रादिभिःपूजयेत् ॥ अत्रकेचित्पूर्वस्यपितृपादोदक
तीर्थपूजांकुर्वंति ॥ तद्यथातीर्थपात्रंतंडुलादिकृतमंडलेसंस्थाप्यपुरुषसूक्तेनतीर्थराजापनमइतिषोड

शोपचारैःसंपूज्यततपात्रंशिरसिधृत्वाबंधुभिःसहविप्रान्प्रदक्षिणीकृत्यगुरुर्ब्रह्मागुरुर्विष्णुरितिनत्वाप्रथमवि
प्रहस्तात्तत्तीर्थंपिबेत् ॥ ॥ तत्रमंत्रः ॥ ॥ अविद्यामूलशमनंसर्वपापप्रणाशनं ॥ पिबामिगुरु
पत्तीर्थंपुत्रपौत्रप्रवर्धनमिति ॥ कर्मेश्वरार्पणंकुर्यात् ॥ कृत्वाचसुहृद्युतोभुंजीत ॥ वर्षपर्यंतंम्मृततति
थौएवमेवाराधनंकार्यं ॥ नतुप्रतिमासिकश्रात्धं ॥ ॥ प्रत्यब्दंतुपार्वणश्रात्धंकृत्वाराधनंमपिकार्यं ॥
ततोदर्शमहालयादिश्राद्धान्यपिसर्वसाधारण्येनकार्याणि ॥ नतत्रविशेषः ॥ ॥ इति यतेःसमा
राधन विधिःसमाप्तः ॥ ॥ छ ॥ ॥ ५ ॥ ॥ ॥ ॥ ॥ छ ॥

॥ १०६ ॥ ॥ अथ आम श्रात्ध विधि प्रारंभः

श्रीगणेशायनमः ॥ ॥ अथआमश्रात्धविधिप्रारंभः ॥ तत्रकेनचित्त्संकटेनपाकासंभवेजातकर्मणिच
ग्रहणनिमित्तकश्रात्धेचामश्रात्धंकार्यं ॥ सपिंडीश्रात्धंमासिकंप्रतिवार्षिकंमहालयाष्टकान्वष्टकादिश्रा
त्धंचामेनकार्यं ॥ शूद्रस्यतुदशाहपिंडादिश्रात्धमात्रमामेननकदापिपाकेनतत्रपितॄनुद्दिश्यामुकश्रात्धंस
दैवंसपिंडमामेनहविषाकरिष्ये ॥ इतिसंकल्पः ॥ अन्यः प्रयोगः पूर्वोक्तएव ॥ पाकप्रोक्षणस्थाने
आमप्रोक्षणं ॥ आवाहनेउशंतस्त्वेतिमंत्रेहविषेअत्तवेइत्यत्रहविषेस्वीकर्तवेइत्यूहः ॥ भस्ममर्यादांतं

प्राग्वत् ॥ विप्रहस्तेषुतंडुलैरग्नौकरणं ॥ अन्नाच्चतुर्गुणंद्विगुणंसमंवातत्तदामंपात्रेषुसंस्थाप्यपाणि
होमशेषंपिंडार्थंसंस्थाप्यपात्रेषुदत्वापृथ्वीतेपात्रमित्यादि ०इदमामंहव्यंकव्यमित्यादिइदमाममम्तरू
पंस्वाहेत्यादियथाधर्ममध्वित्यंतंप्राकृतंयथासुखंजुषध्वमित्यस्यापोशानप्राणाहुतितृप्तिप्रश्नानांलोपःसंप
न्नवाचनांतंन्नशेषप्रश्नलोपः सर्वमतेतंडुलैःसक्तुभिर्वापिंडदानंकेचिद्गृहसित्वान्नेनपायसेनवापिंडदानमा
हुः ॥ एवंविप्रसमीपेपिंडदानांतेनमोवःपितरइषेइत्यत्रोपस्थानमंत्रेइषेस्थानेआमद्रव्यायेत्यूहःपिंडोद्वा
सनांतेपिंडजातीयद्रव्येणविकिरदानंआमश्राद्धेस्वस्तीतिब्रूतेतिवर्ज्यंवाजेवाजेइतिमंत्रेतृप्तायातेतिस्थाने
तर्पिष्यमाणायातेत्यूहःततःप्राग्वच्छेषंसमापयेत् ॥ आमश्राद्धंद्विजैःपूर्वाह्णेकार्यं शूद्रैरपराह्णएवआमा
न्नाभावेहिरण्यश्राद्धमप्येवमेवसंकल्पादौहिरण्यपदमामस्थानेयोज्यं आमवद्धेमप्रोक्षणं अत्तव इत्या
दिमंत्र त्रयोहः प्राग्वदेव तंडुलादि भिर्हस्तेग्नौकरणंहिरण्यमन्नादष्टगुणंचतुर्गुणंद्विगुणंसमंवादे
यंहिरण्यश्राद्धेपिदक्षिणास्त्येवश्राद्धीयमामंहेमंवाद्विजदत्तंयथेष्टंविनियोज्यं शूद्रदत्तंतुभोजनादन्यत्रवि
नियोज्यं श्राद्धीयामेनपंचयज्ञाःश्राद्धंचनकार्यं ॥ १ ॥ हेमश्राद्धेआमश्राद्धेचपिंडदानविकल्पात्सांक
ल्पविधिनाप्येतद्द्वयं ॥ सांकल्पिकेचसमंत्रकावाहनार्घ्याग्नौकरणपिंडदानविकिराक्षय्यस्वधावाचनप्रश्ना
इत्येतत्सप्तकंवर्ज्यं ॥ तत्रामुकश्राद्धंआमेनहविषाहिरण्येनवासांकल्पविधिनाकरिष्यइतिसंकल्पः ॥ मू

द्गृहेऽन्यदीयमपिक्षीराद्यपिनभक्ष्यंकिमुतदीयमामादितद्गृहेपक्कान्नंनभोक्ष्यामिति ॥ तस्माच्छूद्राल्लब्धं चगृहेपक्कामक्ष्यं ॥ इत्यामश्रात्धविधिःसमाप्तः ॥ ॥ ७ ॥ ॥ ॥ ॥ ७ ॥

॥ १०७ ॥ ॥ अथ भरणी श्रात्ध निर्णय प्रारंभः

श्रीगणेशायनमः ॥ ॥ अथभरणीश्रात्धनिर्णयप्रारंभः ॥ तत्रापरपक्षेभरणीश्रात्धाद्रयाप्राप्तिः ॥ ॥ भरणीश्रात्धमपिंडकंषट्दैवतंसांकल्पविधिनाकार्यंदेवाधूरिलेचनौपुरुरवाद्रौवाभरणीश्रात्धंकाम्यंगया श्रात्धफलकामेनप्रतिवर्षकार्यं ॥ केचित्प्रित्रादिमरणोत्तरंप्रथमवर्षेएवकुर्वंति द्दितीयादिवर्षेनकुर्वंतितत्र मूलंचिंत्यंममतुनदैवंनापिबापित्र्यंयावत्पूर्णोनवत्सरइत्याद्युत्तयासर्वस्यापिदर्शादि श्रात्धस्यप्रथमाब्दे।निषे धाद्दर्षीतएवापितृत्वप्राप्तेश्चद्दितीयादिवर्षएवकर्तुंयुक्तामितिभाति ॥ यत्तुपितृभिन्नोयोयोम्रियतेतस्यप्रथमा ब्देभरणीश्रात्धंक्रियतेतत्रापिमूलंनपश्यामःगयाश्राद्धफलार्थमाचारमनुस्मृत्याक्रियतेचेत्मृताद्येकमेवपा र्वणमुद्दिश्यसदैवंकार्यं ॥ आद्यदेशकालौस्मृत्वाद्यपूर्वोच्चरितएवंगुणविशेषणावि० प्राप्त्यर्थंगयाश्रात्धफ लप्राप्त्यर्थंभरणीश्रात्धंकरिष्ये इतिसंकल्पः शेषंसांकल्प विधि नैव कार्यं ॥ ॥ इति भरणी श्रात्ध निर्णय विधिः समाप्तः ॥ ॥ ७ ॥ ॥ ॥ ७ ॥ ॥ ॥ ७ ॥ ॥

॥ १०८ ॥ ॥ अथ अक्षय्यतृतीया युगादि श्राद्ध निर्णय विधि प्रारंभः ॥

श्रीगणेशायनमः अथअक्षय्यतृतीयानिर्णयविधिप्रारंभः ॥ अस्यांतृतीयायांयत्किंचिज्जपहोमपितृतर्पणं
दानादिचक्रियतेतत्सर्वमक्षयं इयंरोहिणीबुधयोगेमहापुण्या अस्यांजपहोमादिकृत्येपिवक्ष्यमाणयुगादि
वन्निर्णयः इयंकृतयुगस्यादिः अत्रयुगादिश्राद्धमपिंडकमनुष्ठेयं श्राद्धासंभवेतिलतर्पणमप्यत्रकार्यं त
त्रासंभवेऽपराह्णेपि कृष्णयुगादिकार्यत्वपराह्णइत्यादिमन्वादिप्रकरणोक्तनिर्णयः द्वेधाविभक्तंदिनपूर्वार्धे
कदेशव्यापिनीदिनद्वयेचेत्त्रिमुहूर्ताधिकव्याप्तिसत्वेपरात्रिमुहूर्तान्यूनत्वेपूर्वा मन्वादौचयुगादौचग्रहणेचंद्र
सूर्ययोः व्यतिपातेवैधृतौचतत्कालव्यापिनीक्रियेतिवचनेनसांकल्पव्याप्तिवाक्यानांअपवादात् श्राद्धादि
कंचतृतीयामध्येएवकर्तव्यं ॥ पुरुषार्थचिंतामणौतुसप्तमाष्टमनवममुहूर्तानांगांधर्वकुतुपरौहिणसंज्ञका
नांयुगादिश्राद्धकालत्वात्शुक्लेमध्यमदिनमानेत्रयोदश्यादिपंचदश्यंतघटित्रयव्यापिन्यांश्राद्धंकृष्णेतुषोड
शीमारभ्यघटिकात्रयेउभयत्रतादृशघटित्रयव्याप्तौसत्वमसत्यांवाशुक्लापरायदातुपरेद्युस्त्रयोदशघटितः पू
र्वसमाप्तापूर्वेद्युस्त्रयोदश्यादिघटित्रयेतदेकदेशेवाविद्यतेतदाकर्मकालशास्त्रबाहुल्यात्पूर्वैवग्राह्येत्युक्तंइद
मेवयुक्तमितिभाति ॥ अत्रदेवतोद्देशेनपितृुद्देशेनचोदकुंभदानमुक्तं ॥ तत्रसंकल्पः ॥ श्रीपरमेश्वरप्रीत्य

र्थंवसंतमाधवदेवताप्रीत्यर्थंपितृप्रीत्यर्थंचब्राह्मणायोदकुंभदानमहंकरिष्ये ॥ तदंगकुंभपूजनंब्राह्मणपूजनंचकरिष्ये ॥ इतिसंकल्प्यसूत्रवेष्टितंगधफलयवाद्युपेतंकलशंपंचोपचारैर्ब्राह्मणंचसंपूज्य ॥ तत्रमंत्रः ॥ एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः ॥ अस्यप्रदानात्सकलाममसंतुमनोरथाइतिमंत्रेणदद्यात् ॥ पितृुद्देशेतुपितॄणामक्षय्यतृप्त्यर्थंउदकुंभदानंकरिष्येइतिसंकल्प्यपूर्ववत्कुंभब्राह्मणौसंपूज्योदकुंभेगंधतिलफलादिनिक्षिप्यएषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः ॥ अस्यप्रदानात्तृप्यंतुपितरोऽपिपितामहाः ॥ गंधोदकतिलैर्मिश्रंसान्नंकुंभंफलान्वितं ॥ पितृभ्यःसंप्रदास्यामिअक्षय्यमुपतिष्ठत्वितिमंत्रेणदद्यात् ॥ युगादौसमुद्रस्नानंमहाफलं वैशाखस्याधिमासत्वेयुगादिश्राद्धंमासद्वयेपिकार्यंयुगादिषूपवासोमहाफलः ॥ युगादिमन्वादौरात्रिभोजनेअभिस्वघृष्टिमितिमंत्रजपः ॥ युगादिश्राद्धलोपमन्यप्रत्यवायपरिहारार्थंमृग्विधानोक्तंप्रायश्चित्तंकरिष्येइतिसंकल्प्यनयसद्यावेत्यृचंशतवारंजपेत् ॥ अयंनिर्णयःसर्वयुगादौज्ञेयः ॥ इत्यक्षय्यतृतीयानिर्णयविधिःसमाप्तः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ १०३ ॥ ॥ अथ महालयश्राद्धसंकल्पविधिप्रारंभः ॥

श्रीगणेशायनमः ॥ अथमहालयश्राद्धसंकल्पविधिप्रारंभः ॥ तातांबात्रितयंसपत्नजननीमातामहादित्रयं

सस्त्रीस्त्रीतनयादितातजननीस्वभ्रातरःसस्त्रियः ॥ तात्तांबात्मभगिन्यपत्यधवयुक्जायापितासद्गुरुःशि
ष्याप्ताःपितरोमहालयविधौतीर्थेतथातर्पणे ॥ आचम्यऊर्ध्वकेशी॰ ॥ अपसर्पंतु॰ ॥ अपक्रामंतु॰ ॥ स
र्वेषामविरोधेनश्राद्धकर्मसमारभेत् ॥ ॐ पवित्रंते॰ ॥ पवित्रंधृत्वा ॥ प्राणानायम्य ॥ पितृदेवताभ्योनम ॥
विष्णवेनमः ॥ ३ ॥ श्रीमद्भगवतो॰ पुण्यतिथौममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंधूरिलो
चनसंज्ञकानांविश्वेषांदेवानांविश्वेषांदेवाना ॥ प्राचीनावीती ॥ अस्मत्पितृपितामहप्रपितामहानांअमुक
शर्मणांअमुकगोत्राणांवसुरुद्रादित्यस्वरूपाणां ॥ मातृपितामहीप्रपितामहीनांअमुकदानांअमुकगोत्रा
णांवसुरुद्रादित्यस्वरूपाणांसापत्नमातुः अमुकदायाः अमुकगोत्रायाः वसुरूपायाः मातामहमातुः
पितामहमातुःप्रपितामहानांअमुकशर्मणांअमुकगोत्राणांवसुरुद्रादित्यस्वरूपाणां मातामहीमातुःपिताम
हीमातुः प्रपितामहीनांअमुकदानांअमुकगोत्राणावसुरुद्रादित्यस्वरूपाणां पत्न्याः अमुकदायाः अमुक
गोत्रायाः वसुरूपायाः पुत्रस्य अमुक॰ अमुक॰ गोत्र॰ वसुरूपस्य पितृव्यस्यअमुकशर्मणः अमुकगो
त्रस्यसपत्नीकस्यससुतस्यवसुरूपस्यमातुलस्यअमुकशर्मणः अमुकगोत्रस्यसपत्नीकस्यससुतस्यवसुरू
पस्यभ्रातुः अमुक॰ अमुकगोत्रस्यसपत्नीकस्यससु॰ वसुरूपस्यपितृभगिन्याः अमुकदायाः अमुक
गोत्रायाः सभर्तृकायाः ससुता॰ वसुरूपायाःमातृभगिन्याः अमुकदायाः अमुकगोत्रायाः सभर्तृकायाः

ससुतायाः वसुरूपायाःआत्मभगिन्याः अमुकदायाः अमुकगोत्रायाः सभर्तृकायाः ससुतायाः वसुरूपायाः श्वशुरस्यअमुकशर्मणः अमुकगोत्रस्यसपत्नीकस्यससुतस्यवसुरूपस्यगुरोः अमुकशर्मणः अमुकगोत्रस्यसपत्नीकस्यससुतस्यवसुरूपस्यशिष्यस्यअमुकशर्मणः अमुकगोत्रस्यवसुरूपस्यएतेषांएतासांचश्रेयोर्थमोक्षार्थंतृप्त्यर्थंममपितुः कन्यागतेसवितरिसकृन्महालयापरपक्षिकश्राद्धंसदैवंसापिंडंसाग्नौकरणंपार्वणैकोद्दिष्टविधिनाअन्नेनहविषासद्यः करिष्येअथवाममपितुः सकृन्महालयापरपक्षश्राद्धंब्रह्मार्पणेनविधिनाअन्नेनहविषासद्यः करिष्येइतिवासंकल्पः ॥कुरुष्व ॥ तदंगआदौआत्मशुध्यर्थंगृहशुध्यर्थंभांडभाजनशुध्यर्थंप्रायश्चित्तार्थंवैश्वदेवसूक्तजाप्यमहंकरिष्ये ॥ तदंगयवोदकंतिलोदकंचकरिष्ये ॥ कुरुष्व ॥ ॥ इतिमहालयसंकल्पः समाप्तः ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ ११० ॥ ॥ अथ प्रतिसांवत्सरिकश्राद्धसंकल्पप्रारंभः ॥

श्रीगणेशायनमः ॥ अथप्रतिसांवत्सरिकश्राद्धसंकल्पप्रारंभः ॥ आचम्य ॥ ॐ पवित्रंतेविततंब्रह्मणस्पतेप्रभुर्गात्राणिपर्येषिविश्वतः ॥ अतप्ततनूर्नतदामोऽअश्नुतेशृतासइद्वहंतस्तत्समाशत ॥ पवित्रंधृत्वा ॥ ऊर्ध्वकेशीविरूपाक्षीमांसशोणितभक्षणे ॥ तिष्ठदेविशिखाबद्धेचामुंडेह्यपराजिते ॥ अपसर्पंतुयेभूता

येभूताभूमिसंस्थिताः ॥ येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया ॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं ॥ सर्वेषामविरोधेनश्राद्धकर्मसमारभेत् ॥ प्राणानायम्य ॥ पितृदेवताभ्योनमः ॥ विष्णुर्विष्णुःश्रीमद्भगवतो महापुरुषस्यइत्यादिसंकल्पंकृत्वाश्रीपरमेश्वरप्रीत्यर्थंपुरूरवार्द्रवसंज्ञकानांविश्वेषांदेवानांविश्वेषांदेवानां प्राचीनावीतीअस्मत्पितृपितामहप्रपितामहानांअमुकशर्मणांअमुकगोत्राणांवसुरुद्रादित्यस्वरूपाणांस व्यं ॥ एतेषांचश्रेयोर्थंमोक्षार्थंतृप्त्यर्थंममपितुःप्रतिसांवत्सरिकश्राद्धाख्यंसदैवंसपिंडंसाग्नौकरणंपार्वणे कोद्दिष्टविधिनाअन्नेनहविषासद्यःकरिष्ये ॥ मातृश्राद्धेएतासांचश्रेयोर्थंमो० ॥ आदौआत्मशुध्यर्थंगृहशु ध्यर्थंभांडभाजनशुध्यर्थंप्रायश्चित्तार्थंवैश्वदेवसूक्तजाप्यमहंकरिष्ये ॥ तदंगतिलोदकंयवोदकंचकरिष्ये ॥ कुरुष्व ॥ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकी येशृणुह्यासुषोमया ॥ इतिपात्रेउदकंनिक्षिप्य ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरींसर्व भूतानांतामिहोपह्वयेश्रियं ॥ इतिगंधं ॥ शरासःकुशरासोदर्भासः सैर्याउत ॥ मौंजाअदृष्टावैरिणाः सर्वेसाकन्यलिप्सत ॥ इतिकूर्चंवानिय ॥ यवोसिधान्यराजोवावारुणोमधुसंयुतः ॥ निर्णोदःसर्वपापा नांपवित्रमृषिभिःस्मृतं ॥ इतियवान् ॥ तिलोसिसोमदेवत्योगोसवेदेवनिर्मितः ॥ प्रत्नवद्भिःप्रत्तस्वध

यापितृनिमांल्लोकान्प्रीणयाहिनस्वधानमः ॥ इतितिलान् ॥ माकाकंबीरमुद्वृहोवनस्पतिमशस्तीर्वि
हिनीनशः ॥ मोतसूरोअहएवाचनग्रीवाआदधतेवेः ॥ भृंगिराजपत्रंनिक्षिप्य ॥ याःफलिनीर्याऽअ
फलाअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः ॥ इतिपूगीफलं ॥ हिरण्यरूपः
सहिरण्यसंदृगपांनपात्सेदुहिरण्यवर्णः ॥ हिरण्ययात्परियोनेर्निषद्याहिरण्यदाददत्यन्नमस्मै ॥ इतिहिरण्यं ॥
युवासुवा० गंधपुष्पैःप्रच्छाद्य ॥ ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥सभूमिंविश्वतोवृत्वात्यतिष्ठद्द
शांगुलं ॥ पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ एतावानस्यमहिमा
तोज्यायांश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभव
त्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥ तस्माद्विराळजायतविराजोऽअधिपूरुषः ॥सजातोअत्य
रिच्यतपश्चाद्भूमिमथोपुरः ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसंतोऽअस्यासीदाज्यंग्रीष्मइध्मःशर
द्धविः ॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवाऽअयजंतसाध्याऽऋषयश्चये ॥ तस्माद्यज्ञात्सर्व
हुतःसंभृतंपृषदाज्यं ॥ पशूंतांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानिज

ज्ञिरे ॥ छंदांसिजज्ञिरेतस्माद्यजुःस्तस्मादजायत ॥ तस्मादश्वाअजायंतयेकेचोभयादतः ॥ गावोहज
ज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखंकिमस्यकौबाहूकाऊ
रूपादाउच्येते ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोऽअजायत ॥
चंद्रमामनसोजातश्चक्षोःसूर्योऽअजायत ॥ मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥ नाभ्याआसीदंतरिक्षं
शीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकांऽअकल्पयन् ॥ सप्तास्यासन्परिधयःत्रिःसप्त
समिधःकृताः ॥ देवायद्यज्ञंतन्वानाऽअबध्नन्पुरुषंपशुं ॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यास
न् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥ ॐ ममाग्नेवर्चोविहवेष्वस्तुवयंत्वेंधानास्तन्वंपुषे
म ॥ मह्यंनमंतांप्रदिशश्चतस्रस्त्वयाध्यक्षेणपृतनाजयेम ॥ ममदेवाविहवेसंतुसर्वइंद्रवंतोमरुतोविष्णुरग्निः
ममांतरिक्षमुरुलोकमस्तुमह्यंवातःपवतांकामेऽअस्मिन् ॥ मयिदेवाद्रविणम।यजंतांमय्याशीरस्तुमयिदे
वहूतिः ॥ दैव्याहोतारोवनुषंतपूर्वेरिष्टास्यामनन्वासुवीराः ॥ मह्यंयजंतुममयानिहव्याकूतिःसत्यामनसो
मेअस्तु ॥ एनोमानिगांकतमच्चनाहंविश्वेदेवासोऽअधिवोचतानः ॥ देवीःषळुर्वीरुरुनःकृणोतविश्वेदेवा

सङ्हवीरयध्वं ॥ माहास्महिप्रजयामातनूभिर्मारिधामाद्दिषतेसोमराजन् ॥ १ ॥ अग्नेमन्युंप्रतिनुदन्परे
षामदब्धोगोपाःपरिपाहिनस्त्वं ॥ प्रत्यंचोयंतुनिगुतःपुनस्ते मैषांचित्तंप्रबुधांविनेशत् ॥ धाताधातृणां
भुवनस्ययस्पतिर्देवंत्रातारमभिमातिषाहं ॥ इमंयज्ञमश्विनोभाबृहस्पतिर्देवाःपांतुयजमानंन्यर्थात् ॥ उ
रुव्यचानोमहिषःशर्मयंसदस्मिन्हवेपुरुहूतःपुरुक्षुः ॥ सनःप्रजायैहर्यश्वमृळयेंद्रमानोरीरिषोमापरा
दाः ॥ येनःसपत्नाअपतेभवंत्विंद्राग्निभ्यामवबाधामहेतान् ॥ वसवोरुद्राऽआदित्याउपरिस्पृशं
मोग्रंचेत्तारमधिराजमक्रन् ॥ अर्वांचमिंद्रममुतोहवामहेयोगोजिद्धनजिदश्वजिद्यः ॥ इमंनोय
ज्ञंविहवेजुषस्वास्यकुर्मोहरिवोमेदिनंत्वा ॥ २ ॥ ॐ तरत्समंदीधावतिधारासुतस्यांधसः ॥ तरत्स
मंदीधावति ॥ उस्रावेदवसूनांमर्तस्यदेव्यवसः ॥ तरत्समंदीधावति ॥ ध्वस्रयोःपुरुषंत्योरासहस्राणिद
द्महे ॥ तरत्समंदीधावति ॥ आययोस्त्रिंशतंतनासहस्राणिचदद्महे ॥ तरत्समंदधिावति ॥ हंसःशुचि
षद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतं ॥
नतमंहोनदुरितंदेवासोअष्टमर्त्यं ॥ सजोषसोयमर्यमामित्रोनयंतिवरुणोऽअतिद्विषः ॥ तद्धिवयंवृणीमहे

वरुणमित्रार्यमन् ॥ येनानिरंहसोयूयंपाथनेथाचमर्त्यमतिद्विषः ॥ तेनूनंनोयमूतयेवरुणोमित्रोअर्यमा ॥ न
यिष्ठाउनोनेर्षणिपर्षिष्ठाउनःपर्षण्यतिद्विषः ॥ यूयंविश्वंपरिपाथवरुणामित्रोऽअर्यमा ॥ युष्माकंशर्म
णिप्रियेस्यामसुप्रणीतयोतिद्विषः ॥ आदित्यासोऽअतिस्रिधोवरुणोमित्रोऽअर्यमा ॥ उग्रंमरुद्भीरुद्रंहुवेमेंद्र
मग्निंस्वस्तयेतिद्विषः ॥ नेतारऊषुणस्तिरोवरुणोमित्रोअर्यमा ॥ अतिविश्वानिदुरितारांजानश्चर्षणीनाम
तिद्विषः ॥ शुनमस्मभ्यमूतयेवरुणोमित्रोऽअर्यमा ॥ शर्मयच्छंतुसप्रथआदित्यासोयदीमहेअतिद्विषः ॥
यथाहत्यद्वसवोगौर्यंचित्पदिषितामर्मुचतायजत्राः ॥ एवोष्व१स्मन्मुंचताव्यंहःप्रतार्यग्नेप्रतरंनऽआयुः ॥
यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्या१श्चरामसि ॥ अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेव
रीरिषः ॥ ॥ ॐ भूर्भुवःस्वः तत्सवितु• ॥ शुचींवोहव्यामरुतःशुचीनांशुचिंहिनोम्यध्वरं
शुचिभ्यः ॥ ऋतेनसत्यमृतसापआयंछुचिजन्मानःशुचयःपावकाः ॥ अग्निःशुचिव्रततमःशुचिर्वि
प्रःशुचिःकविः ॥ शुचीरोचतआहुतः ॥ उदग्नेशुचय स्तवशुक्राभ्राजंतईरते ॥ तवज्योतींष्यर्चयः ॥
एतोन्विंद्रंस्तवामशुद्धंशुद्धेनसाम्ना ॥ शुद्धैरुक्थैर्वावृध्वांसंशुद्धआशीर्वान्ममत्तु ॥ इंद्रंशुद्धोनऽआग

हिशुद्धःशुद्धाभिरूतिभिः ॥ शुत्वोरयिंनिधारयशुद्धोममद्धिसोम्यः ॥ इंद्रशुद्धोहिनोरयिंशुद्धोरत्नानिदा
शुषे ॥ शुद्धोवृत्राणिंजिघ्नसेशुद्धोवाजंसिषाससि ॥ अपवित्रःपवित्रोवासर्वावस्थागतोपिवा ॥ यःस्मरे
त्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ सर्वाणिस्थलानिशुचीनिभवंतु ॥ ब्राह्मणैःअस्तुशुचिमत् ॥ ततः
प्रदक्षिणात्रयंकुर्यात् ॥ तत्रब्रह्मदंडार्थसतिलकुशहिरण्यंनिक्षिप्य ॥ ॐ भूर्भुवःस्वः ॥ समस्तसंप
त्समवाप्तिहेतवःसमुत्थितापत्कुलधूमकेतवः ॥ अपारसंसारसमुद्रसेतवःपुनंतुमांब्राह्मणपादपांसवः ॥
आपद्घनध्वांतसहस्रभानवःसमीहितार्थार्पणकामधेनवः ॥ समस्ततीर्थांबुपवित्रमूर्तयोरक्षंतुमांब्राह्मणपा
दपांसवः ॥ विप्रौघदर्शनात्क्षिप्रंक्षीयंतेपापराशयः ॥ वंदनान्मंगलावाप्तिरर्चनादच्युतंपदं ॥ आधि
व्याधिहरंनृणांमृत्युदारिद्र्यनाशनं ॥ श्रीपुष्टिःकीर्तिदंवंदेविप्रश्रीपादपंकजं ॥ यावतीर्वैदेवतास्ताःस
र्वावेदवेदिब्राह्मणेवसंतितस्माद्ब्राह्मणेभ्योवेदविद्भ्योदिवेदिवेनमः स्कुर्यान्नाश्लीलंकीर्तयेदेताएवदेवताः
प्रीणाति ॥ द्वौनमस्कारौकृत्वा ॥ प्राचीनावीती ॥ अक्रोधनैःशौचपरैःसततंब्रह्मचारिभिः ॥ भवित
व्यंभवद्भिश्चमयाचश्राद्धकारिणा ॥ ॥ अद्यतिथौअस्मत्पितॄनुद्दिश्य ॥ ॥ प्रतिसांवत्सरिकश्रा
द्धंकर्तुंममअधिकारसंपदस्त्वितिभवंतोब्रुवंतु ॥ ब्राह्मणैःअस्तुश्राद्धाधिकारसंपत् ॥ एवंसर्वत्र ॥ स

र्थ्य ॥ कालस्यमुख्यःकालोस्त्वितिभवंतोब्रुवंतु ॥ कालस्यमुख्यःकालोस्तु ॥ पाकादीनांहवियोग्यतास्त्व
तिभवंतोब्रुवंतु ॥ पाकादीनांहवियोग्यतास्तु ॥ नमोदेवेभ्यःस्वधापितृभ्यःक्षणपाद्यासनंचकरिष्ये ॥
कुरुष्व ॥ पुरूरवार्द्रवसंज्ञकश्वेदेवस्थानेक्षणंदत्ताभवद्भिःप्रसादःकर्तव्यः सुकर्तव्यः ॥ द्वितीयविश्वेदे
वस्थानेक्षणंदत्ताभवद्भिःप्रसादःकर्तव्यः ॥ सुकर्तव्यः ॥ प्राचीनावीती ॥ अस्मत् पितृपिता
महप्रपितामहस्थानेक्षणंदत्ताभवद्भिःप्रसादःकर्तव्यः ॥ सुकर्तव्यः ॥ मंडलंकुर्यात् ॥ प्रादेशमात्रंदेवा
नांमंडलंचतुरस्रकं ॥ वितस्तिमात्रंपितृमंडलंवर्तुलंकुर्यात् ॥ सव्यं ॥ देवपाद्यासनेइदमासनं ॥ अ
त्रंनमः ॥ गंधःनमः ॥ पुष्पंनमः ॥ सर्वोपचाराः यवैःसंपूर्णाःसंतु ॥ अपसव्यं ॥ पितृपाद्यासनेइदमा
सनं ॥ अन्नंनमः ॥ गंधःनमः ॥ पुष्पंनमः ॥ सर्वोपचाराःतिलैःसंपूर्णाःसंतु ॥ सव्यं ॥ देवाःस्वागतं
सुस्वागतं ॥ पूरूरवार्द्रवसंज्ञकाविश्वेदेवाःब्रह्मणेभूर्भुवःस्वःइदंवःपाद्यं ॥ सुपाद्यं ॥ एवंद्वितीयः ॥ शं
नोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ ॥ इतिमंत्रेणब्राह्मणानांशुद्धोदकेनपादक्षाल
नंकुर्यात् ॥ अपसव्यं ॥ पितःस्वागतं ॥ सुस्वागतं ॥ पितःअमुकशर्मन् अमुकगोत्रवसुरूपब्रह्मणे
भूर्भुवःस्वःइदंतेपाद्यं ॥ सुपाद्यं ॥ एवंपितामह ॥ प्रपितामह ॥ शंनोदेवीतिपूर्ववत् ॥ मंडलात्पूर्व
तोदेवैःपितृभिश्चतथोत्तरे ॥ कर्ताचैवतुईशान्यामेवमाचमनंस्मृतं ॥ सव्यं ॥ सर्वेषांस्वागतं ॥ सुस्वा

गतं ॥ देवाःसमाध्वं ॥ सुसमास्महे ॥ प्राचीनावीती ॥ अस्मत्पितृपितामहप्रपितामहाःस
माध्वं ॥ सुसमास्महे ॥ सव्यं ॥ उपक्रांतं ॥ प्रतिसांवत्सरिकश्राद्धाख्यंकर्मकरिष्ये ॥ कुरुष्व ॥
शन्नोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ यवोसियवयास्मद्द्वेषोयवयाअरातीः ॥ प्रा
चीनावीती ॥ शन्नोदेवीरभिष्टयआपोभवंतुपितये ॥ शंयोरभिस्रवंतुनः ॥ उदीरतामवरउत्परासउन्म
ध्यमाःपितरःसोम्यासः ॥ असुंयईयुरवृकाऋतज्ञाःस्तेनोवंतुपितरोहवेषु ॥ अपाहतासुरारक्षांसिपिशाचाःये
क्षयंतिपृथिवीमनु ॥ अन्यत्रैतोगच्छंतुयत्रैतेषांगतंमनः॥ तिलारक्षंत्वसुरान्दर्भारक्षंतुराक्षसान्पंक्तिंवैश्रोत्रि
योरक्षेदातिथिःसर्वरक्षकः॥सुरक्षकः॥ रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रतिष्ठमुपयामिशर्म ॥ शिशानोअग्निः
क्रतुभिःसमिद्धःसनोदिवासरिषःपातुनक्तं॥अष्टौवसवएकादशरुद्राद्वादशादित्याःश्रात्धद्वारेवैष्णवीरक्षाग
येयंभूमिः ॥ सुभूमिः॥ सव्यं ॥ पाकप्रोक्षणं॥ त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैःसोमधामभिः ॥ अग्नेदक्षैः पुनी
हिनः ॥ पुनंतुमांदेवजनाःपुनंतुवर्सवोधिया ॥ विश्वेदेवाःपुनीतमाजातवेदःपुनीहिमा ॥ प्रप्यायस्वप्र
स्यंदस्वसोमविश्वेभिरंशुभिः ॥ देवेभ्यउत्तमंहविः ॥ ॐ भूर्भुवः स्वः ॥ ॐतत्सवितु० ॥ गायत्र्या
पाकादीनांपवित्रतास्तु ॥ सर्वेपाकाःशुचयोभवंतु ॥ पाकप्रोक्षणविधिवदस्तु ॥ अस्तुविधिवत् ॥ अ

गच्छंतुमहाभागाविश्वेदेवामहाबलाः ॥ येअत्रविहिताश्रात्धेसावधानाभवंतुते ॥ सावधानोस्मि ॥
प्राचीनावीती ॥ श्रात्धभूमौगयांध्यात्वाध्यात्वादेवंगदाधरं ॥ वस्वादींश्चपितृंध्यात्वाततःश्रात्धंप्रवर्तये ॥
प्रवर्तय ॥ सव्यं ॥ अपोदत्वा ॥ पूरूरवार्द्रवसंज्ञकानांविश्वेषांदेवानांब्रह्मणेभूर्भुवस्वरिदमासनं ॥ स्वा
सनं ॥ एवंद्वितीयदेवे ॥ अत्रास्यतांधर्मोसि ॥ अत्रास्यामः॥प्रतिसांवत्सरिकश्रात्धेदैवेआसनेक्षणःक्रीयतां॥
ओंतथा ॥ प्राप्नोतुभवान् ॥ प्राप्नवानि॥ अर्घ्यमासाद्य॥प्रोक्षितायांभुवि॥ पात्रद्वयंनिधाय ॥ गायत्र्याप्रोक्ष्य॥
उद्धृत्य ॥ पुनःप्रोक्ष्य ॥ पूर्वाग्रकुर्चंनिधायअपआसिच्य॥ शन्नोदेवीरभिष्टयआपोभवंतुपीतये॥ शंयोरभिस्र
वंतुनः ॥ इतिसकृदभिमंत्र्य ॥ यवोसिधान्यराजोवावारुणोमधुसंयुतः॥ निर्णोदःसर्वपापानांपवित्रमृषिभिः
ःस्मृतं ॥ देवार्घ्यपात्रयोःअत्रंनमः ॥ गंधंनमः ॥ पुष्पंनमः ॥ सर्वोपचाराःयवैःसंपूर्णाःसंतु ॥देवार्घ्यपात्रेसंप
न्ने ॥ सुसंपन्ने ॥ स्वाहाअर्घ्यापः ॥ अस्तुस्वाहा ॥ अत्र ॥ पूरूरवार्द्रवसंज्ञकान्विश्वान्देवान्भवत्सुयथाय
थंआवाहयिष्ये ॥ आवाहय ॥ विश्वेदेवासआगंतशृणुतामइमंहवं ॥ एदंबर्हिर्निषीदत ॥ विश्वेदेवाःशृणुते
मंहवंमेयेअंतरिक्षेयउपद्यविष्ठ ॥ येऽअग्निजिव्हाउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वं ॥ विश्वान्देवा
नआवाहयामि ॥ आवाहय ॥ अत्र ॥ पूरूरवार्दवसंज्ञकाविश्वेदेवाःब्रह्मणेभूर्भुवःस्वःइदंवोअर्घ्यंस्वाहा ॥

अस्त्वर्घ्यं ॥ यादिव्याआपःपृथिवीसंबभूवुर्याअंतरिक्ष्याउतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञियास्तानआपःशं
स्योनाभवंतु ॥ पूरूरवार्द्रवसंज्ञकेभ्योविश्वेभ्योदेवेभ्यःइदमर्घ्यंदत्तंनमम ॥ एवंद्वितीयदेवे ॥ अत्र ॥ पूरूर
वार्द्रवसंज्ञकाविश्वेदेवाःयथाभागशःअमीवोगंधाः ॥ सुगंधाः स्वाहानमोनमम ॥ इमानिविष्णोर्निर्माल्यतु
लसीपत्राणि ॥ सुपत्राणि ॥ स्वाहानमोनमम ॥ माल्यार्थेइमानिपुष्पाणि ॥ सुपुष्पाणि ॥ स्वाहान
मोनमम ॥ पूजार्थेएषवोधूपः ॥ सुधूपः ॥ स्वाहान० ॥ एषवोदीपः ॥ सुदीपः ॥ स्वाहान० ॥ आच्छादनार्थे
किंचिद्व्यवहारिकद्रव्यं ॥ अस्तुस्वाच्छादनं ॥ अनुलेपनार्थेगोपीचंदनं ॥ धारणार्थेयज्ञोपवीतं ॥ पवित्रा
र्थेइमौकुशौ ॥ अस्तुपवित्रं ॥ प्रत्येकंप्रत्येकंस्वाहानमोनमम ॥ युवासुवासाःपरिवीतआगात्सउश्रेयान्
भवतिजायमानः ॥ तंधीरासःकवयउन्नयंतिस्वाध्यो३मनसादेवयंतः ॥ देवेभ्यःएतेअन्नगंधपत्रपुष्पधूप
दीपअर्चनाच्छादनांतोपचाराःसर्वेपरिपूर्णाभवंतु ॥ अर्चनविधेर्ष्वार्चितमस्तु ॥ न्यूनातिरिक्तंविधिवद
स्तु ॥ अस्तुविधिवत् ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु ॥ न्यूनंसंपूर्णतांयातुसद्योवंदेत
मच्युतं ॥ अच्युतायनमः ॥ गंगायैनमः ॥ गदाधरायनमः ॥ पुंडरीकाक्षायनमः ॥ युष्मदनुज्ञयापि
त्र्यर्चनंकरिष्ये ॥ कुरुष्व ॥ प्राचीनावीती ॥ अस्मत्पितृपितामहप्रपितामहानांअमुकशर्मणांअमुक

गोत्राणांवसुरुद्रादित्यस्वरूपाणां॥ अणेभुर्भुवःस्वःइदमासनं ॥ स्वासनं ॥ अत्रास्यतांधर्मोसि ॥ अत्रा
स्यामः ॥ प्रतिसांवत्सरिकश्राद्धेपित्रेआसनेक्षणः क्रीयतां ॥ ॐ तथाप्राप्नोतुभवान्प्राप्नवानि ॥ अर्घ्यमा
साद्य ॥ प्रोक्षितायांभुवि ॥ पात्रत्रयंनिधाय ॥ गायत्र्याप्रोक्ष्य ॥ उत्धृत्य ॥ पुनःप्रोक्ष्य ॥ दक्षिणाग्रकूर्चं
निधाय ॥ पितृभ्यःओजिष्ठंगृण्हामि ॥ पितामहेभ्यःओजिष्ठंगृण्हामि ॥ प्रपितामहेभ्यः ओजिष्ठंगृ
ण्हामि ॥ शन्नोदेवीरभिष्टयआपोभवंतुपीतये ॥ शंयोरभिस्त्रवंतुनः ॥ तिलोसिसोमदेवत्योगोसवेदेव
निर्मितः ॥ प्रत्नवद्भिःप्रत्तस्वधयापितृनिमांल्लोकान्प्रीणयाहिनःस्वधानमः ॥ इतिमंत्रेणतिलान्पृथक्पात्रे
षुप्रक्षिप्य ॥ पित्राद्यर्घ्यपात्रेषु ॥ अत्रंनमः ॥ गंधं० ॥ पुष्पं० ॥ भृंगिराजप० ॥ सर्वेउपचाराःतिलैः
संपूर्णाःसंतु ॥ पित्रर्घ्यपात्राणिसंपन्नानि ॥ सुसंपन्नानि ॥ स्वधार्घ्याःअस्तुस्वधा ॥ अस्मत्पितृपिता
महप्रपितामहान्अमुकशर्मणःअमुकगोत्रान्वसुरुद्रादित्यस्वरूपान्भवत्सुयथायथंआवाहयिष्ये ॥ आ
वाहय ॥ उशंतस्त्वानिधीमत्युशंतःसमिधीमहि ॥ उशन्नुशतआवहपितॄन्हविषेअत्तवे ॥ आयंतुनःपित
रःसोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदंत्वाधिब्रुवंतुतेवंत्वस्मान् ॥ पितृपितामह
प्रपितामहान्आवाहयामि ॥ आवाहय ॥ अत्र ॥ सव्यं ॥ अस्मत्पितरिदंतेअर्घ्यं ॥ पितामहेदंते

अर्घ्यं ॥ अस्त्वर्घ्यं ॥ यादिव्याआपःपृथिवीसंबभूवुर्याअंतरिक्ष्याउतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञिया
स्तानआपःशंस्योनाभवंतु ॥ प्राचीनावीती ॥ पितृपितामहप्रपितामहाइदमर्घ्यंदत्तंनमम ॥ अस्तुदत्तं
प्रथमपात्रेसंस्रवान्समवनीय ॥ पितृभ्यःस्थानमसि ॥ स्थानमसिप्रणीतायैनमः ॥ इदमासनं ॥ अन्नं
न० ॥ गंधं० ॥ पुष्पं० ॥ सर्वोपचाराःतिलैःसंपूर्णाःसंतु ॥ स्थानमसिप्रच्छाद्य ॥ सव्यं ॥ ताभिरद्भिः
पुत्रकामोमुखमनक्ति ॥ पुत्रवान्भव ॥ अपउपस्पृश्य ॥ अपसव्यं ॥ अस्मत्पितृपितामहप्रपितामहाः ॥
शर्माणः ॥ गोत्राः ॥ वसुरुद्रादित्यस्वरूपाःयथाभागशःअमीवोगंधाःसुगंधाःस्वधानमोनमम ॥ अस्म
त्पितृपितामहप्रपितामहाःअमुकशर्माणःअमुकगोत्रा :वसुरुद्रादित्यस्वरूपाःमाल्यार्थेपुष्पंतुलसीपत्रंभृं
गिराजपत्रसहितंच ॥ सुपत्रंसुपुष्पंस्वधानमोनमम ॥ अस्मत्पितृपितामहप्रपितामहाःअमुकशर्माणःअ
मुकगोत्राःवसुरुद्रादित्यस्वरूपाःपूजार्थेइमौधूपदीपौ ॥ सुधूपदीपौस्वधानमोनमम ॥ आच्छादनार्थे
किंचित्व्यवहारिकद्रव्यं ॥ अस्त्वाच्छादनं ॥ अनुलेपनार्थेगोपीचंदनं ॥ सुचंदनं ॥ धारणार्थेयज्ञोपवी
तंसूपवीतं ॥ फलार्थेपूगीफलं ॥ सुफलं ॥ पवित्रार्थेइमेकुशाः ॥ अस्तुपवित्रं ॥ प्रत्येकंस्वधानमोन
मम ॥ इदंपितृभ्योनमोअस्त्वद्ययेपूर्वासोयउपरासईयुः ॥ येपार्थिवेरजस्यानिषत्तायेवानूनंसुवृजनासु

विश्वु ॥ पितृभ्यःएतेआसनाद्यत्रगंधपुष्पधूपदीपअर्चनाच्छादनांताःपंचोपचाराःसर्वेपरिपूर्णाभवंतु ॥ अ
र्चनविधेष्वार्चितमस्तु ॥ यस्यस्मृत्या० ॥ युष्मदनुज्ञयामंडलादिपात्रासादनंकरिष्ये ॥ कुरुष्व ॥ देव
पात्रेचतुष्कोणंमंडलंकृत्वा ॥ पितृपात्रेवर्तुळाकारंकृत्वा ॥ देवस्यपात्रेसतांकितं ॥ पितृपात्रेनदां
कितं ॥ भोजनपात्राणिस्थापयित्वा ॥ प्राचीनावीती ॥ ॐपिशंगभृष्टिमंभृणंपिशाचिमिंद्रसंभृण ॥
सर्वंरक्षोनिबर्हय ॥ सव्यं ॥ रक्षाणोअग्नेतवरक्षणेभीरारक्षाणःसुमखप्रीणानः ॥ प्रतिष्फुरविरुजवीड्वंहो
जहिरक्षोमहिचिद्वावृधानं ॥ ब्रह्मचतेजातवेदोनमश्चेयंचगीःसदामिवर्धनीभूत् ॥ रक्षाणोअग्नेतनयानि
तोकारक्षोतनस्तन्वोऽअप्रयुच्छन् ॥ यथाचक्रधरोविष्णुस्त्रैलोक्यंपरिरक्षति ॥ एवंमंडलमस्माकंसर्वभूता
निरक्षतु ॥ सर्वेषांपापदृष्टीनांचक्षुर्बध्नातिकेशवः ॥ भस्मनामंडलंकुर्यात्पंक्तिदोषोनविद्यते ॥ करशुद्धिरपोशा
नंपितृपूर्वाणिकारयेत् ॥ सव्यंभवत्स्वेवभवदनुज्ञयाविप्राणावग्नौकरणंकरिष्ये ॥ क्रियतां ॥ करशुद्धिः ॥ अ
पसव्यं ॥ घृताक्तमोदनंपात्रेसंस्थाप्यभागद्वयंकृत्वा ॥ इदंसोमायपितृमतइदमग्नयेकव्यवाहनाय ॥ सव्यं ॥ दे
वानांकरशुद्धिंकृत्वा ॥ बामहस्तेनदक्षिणहस्तमुपस्तीर्य ॥ मध्यात्पूर्वार्धादवदाय ॥ पात्रस्थमवत्तंचाभिघा
र्य ॥ सोमायपितृमतेस्वधानमः ॥ सोमायपितृमतइदंनमम ॥ तथा ॥ अग्नयेकव्यवाहनायस्वधानमःअग्न

येकव्यवाहनायइदंनमम ॥ सव्येनउदकोपस्पर्शनं ॥ ॐ चमेस्वरश्चमेयज्ञोपचतेनमश्च ॥ यत्तेन्यूनंतस्मैत
उपयत्तेतिरिक्तंतस्मैतेनमः ॥ अग्नयेनमः ॥ स्वस्तिश्रद्धांमेधांयशः प्रज्ञांविद्यांबुद्धिंबलं ॥ आयुष्यंते
जआरोग्यंदेहिमेहव्यवाहन ॥ पाणौहुतं ॥ सुहुतं ॥ पात्राभिघारंकृत्वा ॥ मूर्धानंदिवोअरतिंपृथिव्यावै
श्वानरमृतआजातमग्निं ॥ कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥ अपसव्यं ॥ आमा
सुपक्वमैरयमासूर्यंरोहयोदिवि ॥ घर्मंनसामंतपतासुवृक्तिभिर्जुष्टंगिर्वणसेबृहत् ॥ सोमोधेनुंसोमोअर्वंतमा
शुंसोमोवीरंकर्मण्यंददाति ॥ सादन्यंविदथ्यंसभेयंपितृश्रवणंयोददाशदस्मै ॥ उपह्वयेसुदुघांधेनुमेतां
सुहस्तोगोधुगुतदोहदेनां ॥ श्रेष्ठंसवंसवितासाविषन्नोभीद्धोघर्मस्तदुषुप्रवोचं ॥ हिंकृण्वतीवसुपत्नीव
सूनांवत्समिच्छंतीमनसाभ्यागात् ॥ दुहामश्विभ्यांपयोअघ्न्येयंसावर्धतांमहतेसौभगाय ॥ इंद्रस्ययाम
कोशाअभूवन्यज्ञायशिक्षगृणतेसखिभ्यः ॥ दुर्मायवोदुरेवामर्त्यासोनिषंगिणोरिपवोहंत्वासः ॥ वाशीमंत
ऋष्टिमंतोमनीषिणःसुधन्वानइषुमंतोनिषंगिणः ॥ स्वश्वास्थसुरथाः पृश्निमातरःस्वायुधामरुतोयातनाशु

भें ॥ चतुष्कपर्दायुवतिःसुपेशाघृतप्रतीकावयुनानिवस्ते ॥ तस्यांसुपर्णावृषणानिषेदतुर्यत्रदेवादधिरेभा
गधेयं ॥ एकःसुपर्णःसमुद्रमाविवेशसइदंविश्वंभुवनंविचष्टे ॥ तंपाकेनमनसापश्यमंतितस्तंमातारे
ळ्हिसउरेळ्हिमातरं ॥ सुपर्णंविप्राः कवयोवचोभिरेकंसंतंबहुधाकल्पयंति ॥ छंदांसिचदधतोअध्वरेषुग्रहा
न्त्सोमस्यमिमतेद्वादश ॥ पितुंनुस्तोषंमहोधर्माणंतविषीं ॥ यस्यत्रितोव्योजसावृत्रंविपर्वमर्दयत् ॥
स्वादोपितोमधोपितोवयंत्वावृमहे ॥ अस्माकमविताभव ॥ उपनःपितवाचरशिवःशिवाभिरूतिभिः
॥ मयोभुर्वद्विषेण्यःसखासुशेवोअद्वयाः ॥ तवत्येपितोरसारजांस्यनुविष्ठिताः ॥ दिविवाताइवश्रिताः ॥
तवत्येपितोददतस्तवस्वादिष्ठतेपितो ॥ प्रस्वाद्मानोरसानांतुविग्रीवाइवेरते ॥ त्वेपितोमहानांदेवानांमनोहि
तं ॥ अकारिचारुकेतुनातवाहिमवसावधीत् ॥ यददोपितोअजगन्विवस्वपर्वतानां ॥ अत्राचिन्नोम
धोपितोरंभक्षायगम्याः ॥ यदपामोषधीनांपरिंशमारिशामहे ॥ वातापेपीवइद्भव ॥ यत्तेसोमगवाशिरोय
वाशिरोभजामहे ॥ वातापेपीवइद्भव ॥ करंभओषधेभवपीवोवृक्कउदारथिः ॥ वातापेपीवइद्भव ॥
तंत्वावयंपितोवचोभिर्गावोनहव्यासुषूदिम ॥ देवेभ्यस्त्वासधमादमस्मभ्यंत्वासधमादं ॥ कयानश्चित्र

ओंभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ कस्त्वासत्योमदानांमंहिष्ठोमत्सदंधसः ॥ दृळ्हाचि
दारुजेवसु ॥ अभीषुणःसखीनामविताजरितॄणां ॥ शतंभवास्यूतिभिः ॥ देवताभ्यः पितृभ्यश्चमहा
योगिभ्यएवच ॥ नमस्वाहायैस्वधायैनित्यमेवनमोनमः ॥ सव्यं ॥ गायत्रीमंत्रेणअन्नप्रोक्षणं ॥ द
क्षिणजानुंपातयित्वा ॥ तूष्णींपरिषेचनं ॥ सत्यंत्वर्तेन० पृथिवीतेपात्रंद्योरपिधानंब्राह्मणस्यमुखेअमृतं
जुहोमिस्वाहा ॥ ब्राह्मणानांत्वाविद्यावतांप्राणापानयोर्जुहोम्यक्षितमामेक्षेष्ठाः ॥ अत्रामुष्मिल्लोके ॥ अ
तोदेवाअवंतुनोयतोविष्णुर्विचक्रमे ॥ पृथिव्याःसप्तधामभिः ॥ पुरूरवार्द्रव० देवताइदंवोअन्नंइयंभूः
श्रीगयागदाधरोभोक्ता ॥ अहंब्रह्मब्राह्मणोब्राह्मणस्त्वाअवनीयार्थेसुवर्णपात्रस्थितमिदमन्नंअक्षय्यवट
च्छायेयं ॥ पुरूरवार्द्र० देवेभ्यः इदमन्नंहव्यंपरिविष्टंपरिवेक्ष्यमाणंचदत्तंचदास्यमानंचअस्यब्राह्मणस्यआ
तृप्तिपर्यंतंगयस्थंपरब्रह्मअमृतरूपेणसंपद्यतांस्वाहाहव्यंनमम ॥ तत्सद्गयायांविष्णुपदादिचतुर्दशपदेषु
दत्तमन्नमक्षय्यमस्तु ॥ गयागदाधरःप्रीयतां ॥ गयागदाधरःप्रीतोभवतु ॥ येदेवासोदिव्येकादशस्थपृ
थिव्यामध्येकादशस्थ ॥ अप्सुक्षितोमहिनैकादशस्थतेदेवासोयज्ञमिमंजुषध्वं ॥ नमोदेवेभ्यः प्रीयतां ॥
देवानुज्ञयापित्राद्यन्ननिवेदनंकरिष्ये ॥ कुरुष्व ॥ अपसव्यं ॥ सत्यंत्वर्तेन० पृथिवीतेपात्रंद्योरपिधानंब्राह्म

णस्यमुखेअमृतंजुहोमिस्वाहा ॥ अमुष्मिन्लोके ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्यपांसु
रे ॥ पितृपितामहप्रपितामहादेवता इदंवोअन्नंइयंभूःश्रीगयागदाधरोभोक्ताअहंब्रह्मअन्नंब्राह्मणोब्रह्मण
स्त्वाअवनीयार्थेकल्पितरजतपात्रस्थितमिदमन्नंअक्षय्यवटच्छायेयं ॥ अस्मत्पितृपितामहप्रपितामहे
भ्यःअमुकशर्मभ्यःअमुकगोत्रेभ्यःवसुरुद्रादित्यस्वरूपेभ्यःइदमन्नंकव्यंपरिविष्टंपरिवेक्ष्यमाणंचदत्तंचदा
स्यमानंचअस्यब्राह्मणस्यआतृप्तिपर्यंतंगयस्थंपरब्रह्मअमृतरूपेणसंपद्यंतांस्वधाकव्यंनमम ॥ तत्सत्
गयायांरुद्रपदादिचतुर्दशपदेषुदत्तमन्नमक्षय्यमस्तु ॥ गयागदाधरःप्रीयतांप्रीतोभवतु ॥ येचेहपितरोयेच
नेहयांश्चविद्मयांउचनप्रविद्म ॥ त्वंवेत्थयतितेजातवेदःस्वधाभिर्यज्ञंसुकृतंजुषस्व ॥ पितृभ्यःसांकल्पितः
प्रीयतां ॥ सव्यं ॥ ॥ ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं ॥ ॥ ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधि
ना ॥ ॥हरिर्दाताहरिर्भोक्ताहरिरन्नंप्रजापतिः ॥ ॥हरिर्विप्रशरीरस्थोभुंक्तेभोजयतेहरिः ॥ ॥ त्वांयो
गिनश्चिंतयंतित्वांयजंतिचयज्वनः ॥ हव्यकव्यभुगेकस्त्वंपितृदेवस्वरूपधृक ॥ चतुर्भिश्चचतुर्भिश्चद्वाभ्यां
पंचभिरेवच ॥ हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदतु ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ अपसव्यं ॥ ईशानवि
ष्णुकमलासनकार्तिकेयवह्नित्रयार्करजनीशगणेश्वराणां ॥ क्रौंचामरेंद्रकलशोद्भवकश्यपानांपादान्

मामिसततंपितृमुक्तिहेतून् ॥ पंचक्रोशंगयाक्षेत्रंक्रोशमेकंगयाशिरः ॥ यत्रयत्रस्मरिष्यंतिपितॄणांदत्तम
क्षयं ॥ काशीविश्वेश्वरायनमः ॥ पुंडरीकाक्षायनमः ॥ गयागदाधरायनमः ॥ सव्यं ॥ मधुमतींश्राव
यिष्ये ॥ श्रावय ॥ मधुवाताऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नःसंत्वोषधीः ॥ मधुनक्तमुतोषसोमधु
मत्पार्थिवंरजः ॥ मधुद्यौरस्तुनःपिता ॥ मधुमान्नोवनस्पतिर्मधुमाँ२अस्तुसूर्यः ॥ माध्वीर्गावोभवंतुनः
मधुमधुमधुसर्वान्नंमधु ॥ अपसव्यं ॥ एकोविष्णुर्महद्भूतंपृथक्भूतान्यनेकशः ॥ त्रीन्लोकान्व्याप्यभू
तात्माभुंक्तेविश्वभुगव्ययः ॥ अनेनपितुःप्रतिसांवत्सरिकश्राद्धेब्राह्मणायअन्नदानेनभगवान्पितृपिताम
हप्रपितामहस्वरूपीजनार्दनवासुदेवःप्रीयतां ॥ प्रीतोभवतु ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ सव्यं ॥ यथासु
खंजुषध्वं ॥ अमृतंभुंजीत ॥ अमृतऋषिःसत्योदेवता गायत्रीछंदः ॥ अमृतोपस्तरणमसि ॥ श्रद्धा
यांप्राणेनिविष्टोमृतंजुहोमिशिवोमाविशाप्रदाय ॥ प्राणायस्वा ॥ श्रद्धायामपानेनिविष्टोमृतंजुहोमि
शिवोमाविशाप्रदाय ॥ अपानायस्वाहा ॥ श्रद्धायांव्यानेनिविष्टोमृतंजुहोमिशिवोमाविशाप्रदाय ॥
व्यानायस्वाहा ॥ श्रद्धायामुदानेनिविष्टोमृतंजुहोमिशिवोमाविशाप्रदाय ॥ उदानायस्वाहा ॥ श्रद्धा
या२समानेनिविष्टोमृतंजुहोमिशिवोपाविशाप्रदाय ॥ समानायस्वाहा ॥ ब्रह्मणेस्वाहा ॥ ब्रह्मणिमात्मा

नममृतत्वाय ॥ गायत्रीजपंकृत्वा ॥ अपेक्षितंयाचितव्यंत्याज्यंचैवानपेक्षितं ॥ उपविश्यसुखेनैवभोक्त
व्यंस्वस्थमानसैः ॥ विद्यमानशाकपाकेषुयद्रोचतेतद्ग्राह्यंयन्नरोच्चतेतत्त्याज्यं ॥ सुखेनैवभोक्तव्यं ॥ जु
षामहे ॥ रक्षोघ्नसूक्तानिश्रावयिष्ये ॥ श्रावय ॥ अष्टसूक्तानि ॥ कृणुष्वपाजःप्र० ॥ रक्षोहणं० ॥
॥ २ ॥ इंद्रासोमा० ॥ ३ ॥ अग्नेहंसिन्या० ॥ ४ ॥ ब्रह्मणाग्निः० ॥ ५ ॥ इत्यादिसूक्तानि ॥
किंचिद्दध्योदनंगंगामृत्सर्वसंपूर्णं ॥ सिद्धस्यहविषोर्मध्येयद्रोचतेतद्याचयध्वं ॥ अलं ॥ मधुमतींश्राव
यिष्ये ॥ श्रावय ॥ मधुवाताऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नःसंत्वोषधीः ॥ मधुनक्तमुतोषसोमधु
मत्पार्थिवंरजः ॥ मधुद्यौरस्तुनःपिता ॥ मधुमान्नोवनस्पतिर्मधुमांअस्तुसूर्यः ॥ माध्वीर्गावोभवंतुनः ॥
अपसव्यं ॥ अक्षन्नमीमदंतह्यवप्रियाअधूषत ॥ अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विंद्रतेह
री ॥ ॥ अमुकश्राद्धंसंपन्नं ॥ ॥ सुसंपन्नं ॥ सव्यं ॥ विश्वेदेवाःतृप्तास्थ ॥ तृप्तास्मः ॥ अपस
व्यं ॥ पितृपितामहप्रपितामहाःतृप्तास्थ ॥ तृप्तास्मः ॥ शेषमन्नंकिंक्रियतां ॥ इष्टैःसहभोज्यतां ॥ स
व्यं ॥ अद्यपूर्वो० ॥ प्रतिसांवत्सरिकश्राद्धेतिलोदकपिंडप्रदानंकरिष्ये ॥ कुरुष्व ॥ उच्छिष्टभागे
स्योन्नंदीयतां ॥ यजमानकुलेजातादासादास्योन्नकांक्षिणः ॥ तेसर्वेतृप्तिमायांतुमयादत्तेनभूतले ॥ अ

मृतापिधानमासि ॥ रौरवेपूयनिलयेपद्मार्बुदनिवासिनां ॥ अर्थिनामुदकंदत्वाअक्षय्यमुपतिष्टतु ॥ अ
पसव्यं ॥ अपहतासुरारक्षांसिवेदिषदः ॥ तामभ्युक्ष्य ॥ सकृदाच्छिन्नैर्दर्भैरवस्तीर्य ॥ शुंधंतांपितरःशुं
धंतांपितामहाःशुंधंतांप्रपितामहाःशुंधंतांएवंमात्रादि ॥ एतत्तेअस्मत्पितःअमुकशर्मन्अमुकगोत्रवसुरू
पयेचत्वामत्रानुअयंतेपिंडस्वधा ॥ अस्मत्पित्रेअमुकशर्मणेअमुकगोत्रायवसुरूपायअयंपिंडस्वधानमः ॥
तेभ्यश्च ॥ अयंपिंडोगयस्थोदत्तोनमम ॥ काश्यांविश्वेश्वरपादेदत्तमन्नमक्षय्यमस्तु ॥ तत्सद्गयायांविष्णुप
दादिचतुर्दशपदेषुदत्तमक्षय्यमस्तु ॥ अस्मत्पितामह॰ शर्मन् गोत्र रुद्ररूप येचत्वा॰ पितामहा
य शर्मणे॰ ॥ अस्मत्प्रपितामह॰ अ॰ श॰ गो॰ आदित्यरू॰ अस्मत्प्रपितामहाय॰ ॥ महाल
येमात्रादिसर्वेषांपिंडदानंकुर्यात् ॥ ततः ॥ आब्रह्मणोयेपितृवंशजातामातुस्तथावंशभवामदीयाः ॥
वंशद्वयेस्मिन्ममदासभूताभृत्यास्तथैवाश्रितसेवकाश्च ॥ मित्राणिसख्युःपशवश्ववृक्षादृष्टाश्चपृष्टाश्चप
रोपकाराः ॥ जन्मांतरेयेममसंगताश्चतेभ्यःस्वधापिंडमहंददामि ॥ १ ॥ पितृवंशेमृतायेचमातृवंशेत
थैवच ॥ गुरुश्वशुरबंधूनायेचान्येबांधवास्मृताः ॥ येमेकुलेलुप्तपिंडाःपुत्रदारविवर्जिताः ॥ क्रियालोप
गताश्चैवजात्यंधाःपंगवस्तथा ॥ विरूपाआमगर्भाश्चज्ञाताज्ञाताःकुलेमम॥धर्मपिंडोमयादत्तोह्यक्षय्यमुप
तिष्ठतु ॥ २ ॥ असिपत्रवनेघोरेकुंभीपाकेचयेगताः ॥ तेषामुद्धरणार्थायइमंपिंडंददाम्यहं ॥३॥ उत्स

चकुलवंशानांयेषांदाताकुलेन्महि ॥ यर्मेपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतु ॥ ४ ॥ अत्रपितरोमादयध्वं
यथाभागमावृषायध्वं ॥ अमीमदंतपितरोयथाभागमावृषायीत ॥ चरोःप्राणभक्षंभक्षयेत् ॥ असौत्वभ्यं
क्ष्व ॥ पितःअभ्यंक्ष्व ॥ पितःअंक्ष्वातिसर्वत्र ॥ पिंडेष्वंजनाभ्यंजनवासांसिदद्यात् ॥ दशामू
र्णास्तुकांवा एतद्वःपितरोवासोमानोतोन्यत्पितरोयुङ्ध्वं ॥ कुलाभिवृध्यर्थंसव्येनापिंडपूजांकरिष्ये ॥ पिंड
स्थाःपितरःपाद्यंस्वधा॰ अर्घ्यंस्वधा॰ आचमनीयं॰ स्नानं॰ ॥ गंधंस्वधा ॥ पुष्पं॰ ॥ भृंगिराज॰
धूपं॰ ॥ दीपं ॥ नैवेद्यं॰ ॥ तांबूलं॰ ॥ दक्षिणां॰ ॥ अपसव्यं॰ ॥ उपस्थाय ॥ इत्यथैनामुप
तिष्ठेत ॥ ॥ नमोवःपितरइषेनमोवःपितरऊर्जेनमोवःपितरःशुष्मायनमोवःपितरोघोरायनमोवःपि
तरोजीवायनमोवःपितरोरसाय ॥ ॥ स्वधावःपितरोनमोवःपितरोनमएतायुष्माकंपितरइमाअस्मा
कंजीवावोजीवंतइहसंतस्याम ॥ ॥ मनोन्वाहुवामहेनाराशंसेनसोमेन ॥ ॥ पितृणांचमन्म
भिः ॥ आतएतुमनःपुनःक्रत्वेदक्षायजीवसे ॥ ज्योक्चसूर्यंदृशे ॥ पुनर्नःपितरोमनोददातुदैव्यो
जनः ॥ जीवंव्रातंसचेमहि ॥ सव्यं ॥ पिंडान्नमस्कृत्य ॥ अपसव्यं ॥ ऊर्जंवहंतिरमृतघृतंपयःकीला
लंतंतरिस्तुतं ॥ स्वधास्थतर्पयतमेपितॄन्तृप्यततृप्यततृप्यत ॥ परेतनःपितरःसोम्यासोगंभीरेभिःपथि

भिः पूर्वणेभिः ॥ दत्त्वायास्मभ्यंद्रविणेहभद्रंरयिंचनःसर्ववीरंनियच्छत ॥ पिंडांश्चालयित्वा ॥ वीरंमेदत्त
पितरः ॥ ३ ॥ गयायांधर्मपृष्ठेचसदसिब्रह्मणस्पते ॥ गयाशीर्षेवटेचैवपितॄणांदत्तमक्षयं ॥ गयायांपि
तृरूपेणस्वयमेवजनार्दनः ॥ तंदृष्ट्वापुंडरीकाक्षंमुच्यतेचऋणत्रयात् ॥ शमीपत्रप्रमाणेनपिंडंदद्याद्गया
शिरे ॥ उद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतं ॥ सव्यं ॥ असोमपाश्चयेदेवायज्ञभागविवर्जिताः ॥ ते
षामन्नंप्रदास्यामिविकिरंवैश्वदेविकं ॥ असोमपेभ्योविश्वेभ्योदेवेभ्यःइदंविकिरान्नंदत्तंनमम ॥ अपस
व्यं ॥ असंस्कृतप्रमीतायेत्यागिन्योयाःकुलस्त्रियः ॥ दास्यामितेभ्योविकिरमन्नंताभ्यश्चपैतृकं ॥ कुमा
रकुमारिभ्यःगर्भादिनिःसृतेभ्यःइदंप्रकिरान्नंदत्तंनमम ॥ येअग्निदग्धायेअनग्निदग्धामध्येदिवःस्वधयामा
दयंते ॥ तेभिःस्वराळसुनीतिमेतांयथावशंतन्वंकल्पयस्व ॥ येअग्निदग्धेभ्यःयेअनग्निदग्धेभ्यःअस्मत्कु
लप्रसूतेभ्योजीवेभ्यःउच्छिष्टपिंडोगयस्थोदत्तोनमम ॥ तिलोदकंदत्वा ॥ सव्यंपवित्रंविसृज्याचम्य ॥
पवित्रवंतःपरिवाचमासतेपितैषांप्रत्नोअभिरक्षतिव्रतं ॥ महःसमुद्रंवरुणस्तिरोदधेधीराइच्छेकुर्धरुणेष्वा
रभं ॥ अनेनमंत्रेणपवित्रंधृत्वा ॥ शिवाआपःसंतु ॥ सतुशिवाआपः ॥ सौमनस्यमस्तु ॥ अस्तुसौम
नीयं ॥ अक्षतंचारिष्टंचास्तु ॥ अस्त्वक्षतमरिष्टंच ॥ स्वस्तिभवंतोब्रुवंतु ॥ आयुष्मतेस्वस्ति ॥ अघ

सव्यं ॥ शिवाआपःसंतु ॥ संतुशिवाआपः ॥ सौमनस्यमस्तु ॥ अस्तुसौमनीयं ॥ तिलाःपांतु ॥ पां
तुतिलाः ॥ स्वस्तिभवंतोब्रुवंतु ॥ आयुष्मतेस्वस्ति ॥ अस्मत्गोत्रंवर्धतांगोत्रस्याभिवृद्धिरस्तु ॥ पिंडा
नामर्चनविधिष्वर्चितमस्तु ॥ सव्यं ॥ भोजनपात्राण्युच्चालयिष्ये ॥ उच्चालय ॥ देवाःस्वस्तीतिब्रूत ॥
सर्वेस्वस्ति ॥ अपसव्यं ॥ पित्रादिसंकल्पमुच्चार्य ॥ ममपितुःयद्दत्तंप्रतिसांवत्सरिकश्राद्धीयमन्नमुद
कादितदक्षय्यमस्त्वितिभवंतोब्रुवंतु ॥ अस्त्वक्षय्यं ॥ सव्यं ॥ पुरूरवार्द्रवसंज्ञकानांविश्वेषांदेवानांयद्दत्तं
प्रतिसांवत्सरिकश्रद्धीयमन्नमुदकादितदक्षय्यमस्त्वितिभवंतोब्रुवंतु ॥ अस्त्वक्षय्यं ॥ देवानांस्वर्णं ॥ पि
तॄणांरजतं ॥ श्राद्धभुंक्तेभ्योब्राह्मणेभ्यःदक्षिणाःपांतु ॥ पांतुदक्षिणाः ॥ स्वधांवाचयिष्ये ॥ वाच्यतां ॥
अपसव्यं ॥ पितुःस्वधोच्यतां पितामहःस्वधोच्यतांप्रपितामहस्वधोच्यतां ॥ अस्तुस्वधा ॥ पिंडोपरि
तिलोदकंदद्यात् ॥ स्वधासंपद्यतामितिभवंतोब्रुवंतु ॥ संपद्यंतांस्वधा ॥ सव्यं ॥ अग्निपुरोगाविश्वेदे
वाःप्रीयंतामितिभवंतोब्रुवंतु ॥ प्रीयंतांविश्वेदेवाः ॥ अपसव्यं ॥ वसुपुरोगाःपितरःप्रीयंतामितिभवंतो
ब्रुवंतु ॥ प्रीयंतांपितरः ॥ सव्यं ॥ संकल्पसिद्धिरस्त्वितिभवंतोब्रुवंतु ॥ अस्तुसंकल्पसिद्धिः ॥ शाक
पाकाःपितृप्रियाः ॥ उत्तमोत्तमाः ॥ आत्मालंकारः ॥ पिंडान्नमस्कृत्य ॥ पिंडोद्धारणंकरिष्ये ॥ उ

द्वारय ॥ तद्विष्णोः परमंपदंसदापश्यंतिसूरयः ॥ दिवीवचक्षुराततं ॥ तद्विप्रासोविपन्यवोजागृवांसः स
मिंधते ॥ विष्णोर्यत्परमंपदं ॥ अयोध्यामथुरामायाकाशीकांचीअवंतिका ॥ पुरीद्वारावतीचैवसप्तैतामो
क्षदायकाः ॥ पिंडस्थानेशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ स्वस्थानेवासः ॥ वसिष्ठऋषिः ॥ वाजिल्योदेवता ॥
कूर्चविसर्जनेविनियोगः ॥ वाजेवाजेवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाः ॥ अस्यमध्वःपिबतमाद
यध्वंतृप्तायातपथिभिर्देवयानैः ॥ उत्तिष्ठंतुपितरःसव्येनविश्वेदेवैःसह ॥ आमावाजस्यप्रसवोजगम्यादा
द्यावापृथिवीविश्वशंभूः ॥ आमागंतांपितरामातराचामासोमोअमृतत्वायगम्यात् ॥ दातारोनोभिवर्धंतांवे
दाःसंततिरेवनः ॥ श्रद्धाचनोमाव्यगमत्बहुधेयंचनोस्तु ॥ अन्नंचनोबहुभवेदतिथींश्चलभेमहि ॥ या
चतारश्चनःसंतुमाचयाचिष्मकंचन ॥ प्रतिवचनं ॥ दातारोवोभिवर्धंतांवेदाःसंततिरेववः ॥ श्रद्धा
चवोमाव्यगमत्बहुधेयंचवोस्तु ॥ अन्नंचवोबहुभवेदतिथींश्चलभध्वं ॥ याचतारश्चवःसंतुमाचया
चिष्टकंचन ॥ स्वादुषंसदःपितरोवयोधाःकृच्छ्रेश्रितःशक्तीवंतोगभीराः ॥ चित्रसेनाइषुबलाअ
मृध्राःसतोवीराउरवोव्रातसाहाः ॥ ब्राह्मणासःपितरःसोम्यासःशिवेनोद्यावापृथिवीअनेहसा ॥ पूषा

नःपातुदुरितादंतादघोरक्षामाकिर्नोअघशंसईशत ॥ इहैवस्तंमावियोष्टंविश्वमायुर्व्यश्नुतं ॥ क्री
ळंतोपुत्रैर्नप्तृभिर्मोदमानौस्वेगृहे ॥ आयुःप्रजांधनंविद्यांस्वर्गमोक्षंसुखानिच ॥ प्रयच्छंतुतथाराज्यंपितानृ
णांपितामहाः ॥ एताःसत्याःआशिषःसंतु ॥ प्रतिसांवत्सरिकश्राद्धंगयाकृतश्राद्धफलमस्तु ॥ पितृणा
मक्षय्यातृप्तिरस्तु ॥ पितृप्रसादोस्तु ॥ अद्यमेसफलंजन्मभवत्पादाब्जवंदनात् ॥ अद्यमेवंशजाःसर्वेया
यावोनुग्रहाद्दिवं ॥ यत्तुशाकादिदानेनक्लेशितायूयमीदृशाः ॥ तत्क्लेशजातंचित्तेतुविस्मृत्यक्षंतुमर्हथ ॥
विस्मृत्यक्षमामः ॥ अद्यसूर्यपर्वसदृशीतिथिःव्यासवसिष्ठवामदेवसदृशाब्राह्मणाःमयायत्कृतंपितुःप्रति
सांवत्सरिकश्राद्धंतन्मध्येआसनभोजनमंत्रतंत्रद्रव्यदक्षिणाःसर्वंन्यूनंब्राह्मणवचनात्सर्वंसंपूर्णमस्त्वितिभवं
तोब्रुवंतु ॥ ब्राह्मणवचनात्सर्वंसंपूर्णमस्तु ॥ वसिष्ठासःपितृवद्वाचमक्रतदेवांईळानाऋषिवत्स्वस्तये ॥
प्रीताईवज्ञातयःकाममेत्यास्मेदेवासोवधूनुताबसु ॥ देवान्वसिष्ठोअमृतान्ववंदेयेविश्वाभुवनाभिप्रतस्थुः॥
तेनोरासंतामुरुगायमद्ययूयंपातःस्वस्तिभिःसदानः ॥ इदंपितृभ्योनमोअस्त्वद्येतिनमस्कारवतीमंततः
शंसतियस्मादंततःपितृभ्योनमस्क्रियतेतदाहुर्व्याहावंपिभ्याःशंसेत् ॥अव्याहावां३इति ॥ व्याहावमेवशंसे
दसंस्थितंवैपितृयज्ञस्यसाध्वसंस्थितंवाएषपितृयज्ञंसंस्थापयतियोव्याहावंशंसतितस्माद्व्याहावमेवशंसेत्

व्यं ॥ आसीमांतमनुव्रजेत् ॥ अनुव्रज ॥ जपच्छिद्रंतपच्छिद्रंयच्छिद्रंश्राद्धकर्मणि ॥ सर्वंभवतुमेछिद्रंब्राह्मणानांप्रसादतः ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु ॥ न्यूनंसंपूर्णतांयातुसद्योवंदेतमच्युतं ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंद्विजोत्तमाः ॥ श्राद्धंसंपूर्णतांयातुप्रसादाद्भवतांमम ॥ अनेनकन्यागतेसवितरिपितुःप्रतिसांवत्सरिकश्राद्धयज्ञेनपितृपितामहप्रपितामहस्वरूपीजनार्दनवासुदेवःप्रीयतां ॥ एषपितृयज्ञः ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ वषट्तेविष्णवासआकृणोमितन्मेजुषस्वशिपिविष्टहव्यं ॥ वर्धंतुत्वासुष्टुतयोगिरोमेयूयंपातःस्वस्तिभिःसदानः ॥ विष्णवेनमोविष्णवेनमोविष्णवेनमः ॥ अर्घ्यमावाहनंचैवद्विजांगुष्ठनिवेशनं ॥ तृप्तिप्रश्नंचविकिरंतीर्थेपंचविवर्जयेत् ॥ संकल्पासनयोः षष्ठीद्वितीयावाहनेतथा ॥ अन्नदानेचतुर्थीस्याच्छेषंसंबोधनंस्मृतं ॥ इतिप्रतिसांवत्सरिकसमंत्रकश्राद्धसंकल्पःसमाप्तः ॥ ॥ छ ॥

॥ १११ ॥ ॥ अथ दौहित्र श्राद्ध निर्णय प्रारंभः ॥

अथदौहित्रश्राद्धनिर्णयप्रारंभः ॥ आश्विनशुक्लप्रतिपदिदौहित्रेणानुपनीतेनापिसपत्नीकमातामहस्यपार्वणंमातुलेसत्यपिअवश्यंकार्यं ॥ मातामहीसत्वेकेवलमातामहपार्वणं ॥ इदंजीवत्पितृकेणैवकार्यं ॥ इदंसपिंडकमपिंडकंवा अत्रपुरूरवार्द्रवसंज्ञकाविश्वेदेवाःधूरिलोचनाइतिकेचित् ॥ इयंप्रातिपदपराण्ह

व्यापिनीग्राह्येतिबहवः ॥संगवव्यापिनीतिकेचित्केशवादिनामानितिथ्यादिसंकीर्त्यअद्यपूर्वोच्चरितएवं० श्रुतिस्मृतिपु० र्थंमातामहश्राद्धंकरिष्ये इतिसंकल्पः ॥ इतिदौहित्रश्राद्धनिर्णयःसमाप्तः ॥ छ ॥

॥ ११२ ॥ ॥ अथ दर्शश्राद्ध संकल्प प्रारंभः ॥

श्रीगणेशायनमः॥ अथदर्शश्राद्धसंकल्पप्रारंभः॥ आचम्य ॥ प्रवित्रंधृत्वा॥ प्राणायामंकृत्वादेशकालौसंकीर्त्यममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंपुरूरवार्द्रवसंज्ञकानांविश्वेषांदेवानांविश्वेषांदेवानांअपसव्यंअस्मत्पितृपितामहप्रपितामहानांअमुकशर्मणांअमुकगोत्राणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांमातामहमातुःपितामहमातुःप्रपितामहनांअमुकशर्मणांअमुकगोत्राणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांएतेषांएतासांचश्रेयोर्थंमोक्षार्थंतृप्त्यर्थंदर्शश्राद्धंकरिष्ये ॥ इति दर्शश्राद्धे संकल्पः समाप्तः

॥ ११३ ॥ ॥ अथ अविधवान वमीश्राद्ध संकल्प प्रारंभः ॥

श्रीगणेशायनमः॥ ॥ अथअविधवानवमीश्राद्धसंकल्पप्रारंभः ॥ आचम्य ॥ पवित्रंधृत्वा ॥ प्राणानायम्यदेशकालौसंकीर्त्यममआत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंपुरूरवार्द्रवसंज्ञकानांविश्वेषां

देवानांविश्वेषादेवानांअपसव्यंअस्मत्मातृ पितामहीप्रपितामहीनांअमुकशर्मणांअमुकगोत्राणांवसुरुद्रा दित्यस्वरूपाणांएतासांचश्रेयोर्थमोक्षार्थअविधवानवमीश्राद्धाख्यंकर्मकारिष्ये ॥ कुरुष्व ॥ ॥ इति अविधवान वमी श्राद्धसंकल्पः समाप्तः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ११४ ॥ ॥ आरत्या प्रारंभः ॥

श्रीगणेशायनमः १ ॥ ॥ आरतीगणपतीची ॥ सुखकर्तादुःखहर्तावार्ताविघ्नाची ॥ नुरवीपुरवीप्रेम कृपाजयाची ॥ सर्वांगीसुंदरउटिशेंदूराची ॥ कंठींझळकेमाळमुक्ताफळांची ॥ जयदेवजयदेवजयमंगलमूर्ती ॥ दर्शनमात्रेंमनकामनापुरती ॥ ध्रु० ॥ १ ॥ रत्नखचितफरातुजगौरीकुमरा ॥ चंदनाची ऊटीकुमकुमकेशरा ॥ हीरेजडितमुगुटशोभतोबरा ॥ रुणझुणतीनेपूरेंचरणीघागरिया ॥ २ ॥ लंबोदरपीतांबरफणिवरबंधना ॥ सरळसोंडवक्रतुंडत्रीनयना ॥ दासरामाचावाटपाहेसदना ॥ संकष्टींपावावेंनिर्वाणीरक्षावेंसुरवरवंदना ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

२ आरतीगणपतीची ॥ ॥ नानापरिमळदूर्वाशेंदुरशामिपत्रेंलाडूमोदकअन्नेंपरिपूर्णपात्रें ॥ ऐसेंपूजन केलेंबीजाक्षरमंत्रें ॥ अष्टौसिद्धीनवनिधीदेशीक्षणमात्रें ॥ १ ॥ जयदेवजयदेवजयमंगलमूर्ती ॥

तुझेगुणवर्णायामजकैंचीस्फूर्ती ॥ ध्रु० ॥ तुझेंध्याननिरंतरजेकोणीकरिती ॥ त्यांचींसर्वहिपापैंविघ्नेंही
हरती ॥ वाजीवारणशिबिकासिद्धीहेप्राप्ती ॥ सर्वहिपावुनिअंतींभवसागरतरती ॥ २ ॥ शरणागतस
र्वस्वेंभजतीतवचरणी ॥ कीर्तितयांचीराहेजोंवरिशशितरणी ॥ त्रैलोक्यांतविजयीअद्भुतहेकरणी ॥
गोसावीनंदनरततवनामस्मरणीं ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

३ आरतीसांबाची ॥ ॥ लवथवतीविक्राळाब्रह्मांडींमाळा ॥ वीषेंकंठकाळात्रीनेत्रींज्वाळा ॥ लावण्यें
सुंदरमस्तकींबाळा ॥ तेथुनियांजळनिर्मळवाहेझुळझुळां ॥ १ ॥ जयदेवजयदेवजयश्रीशंकरा ॥ आ
रतीओंवाळूंतुजकर्पुरगौरा ॥ ध्रु० ॥ १ ॥ कर्पुरगौरभोळानयनीवीशाळा ॥ अर्धांगींपार्वतीसुमना
च्यामाळा ॥ विभूतीचेंउजळणश्रीकंठनीळा ॥ ऐसाशंकरशोभेउमावेल्हाळा ॥ २ ॥ देवींदैत्यींसाग
रमंथनपैंकेलें ॥ त्यामाजीअवचीतहाळाहळतेंउठलें ॥ तेंत्वांअसुरपणेंप्राशनकेलें ॥ नीळकंठनामप्रसि
द्धझालें ॥ ३ ॥ व्याघ्रांबरफणिवरधरसुंदरमदनारी ॥ पंचाननमनमोहनमुनिजनसुखकारी ॥ शतकोटी
चेंबीजवाचेउच्चारी ॥ रघुकुलतिलकरामदासाअंतरीं ॥ ॥ ७ ॥ ॥ ॥ ७ ॥

४ आरती विठ्ठलाची ॥ ॥ युगेंआठ्ठावीसाविटेवरीउभा ॥ वामांगींरखुमाईदिसेदिव्यशोभा ॥ पुंडलि
काचेभेटीपरब्रह्मआलेंगा ॥ चरणींवाहेभीमाउद्धरींजगा ॥ १ ॥ जयदेवजयदेवजयपांडुरंगा ॥ रखु

माईवल्लभापावेंजिवलगा ॥ ध्रु० ॥ तुळशीमाळागळांकरठेउनिकटीं ॥ कांसेपीतांबरकस्तुरीलल्लाटीं ॥
देवसुरवरनित्ययेतीभेटी ॥ गरुडहनुमंतपुढेंऊभेराहती ॥ २ ॥ धन्यवेणूनादअनुक्षेत्रपाळा ॥ सुवर्णा
चींकमळेंपदमाळागळां ॥ राईरखुमाबाईराणीयासकळा ॥ ओंवाळीतीराधाविठोबासांवळा ॥ ३ ॥
ओंवाळूंआरत्याकुरवंड्यायेती ॥ चंद्रभागेमाजीसोडुनियांदेती ॥ दिंडीपताकावैष्णवनाचती ॥ पंढरी
चामहिमावर्णावाकिती ॥ ४ ॥ आषाढीकार्तिकीभक्तजनयेती ॥ चंद्रभागेमाजीस्नानेंजेकरिती ॥ दर्श
नहेळामात्रेंतयांहोयमुक्ती ॥ केशवासीनामदेवभावेंओंवाळीती ॥ जयदेव० ॥ ५ ॥ ॥ छ ॥
५ आरती देवीची ॥ ॥ दुर्गेदुर्घटभारींतुजविणसंसारी ॥ अनाथनाथेअंबेकरुणाविस्तारीं ॥ वारींवारीं
जन्ममरणातेंवारीं ॥ हारीपडलोंआतांसंकटनीवारीं ॥ १ ॥ जयदेवीजयदेवीमहिषासुरमथनी ॥ सुर
वरईश्वरिवरदेतारकसंजीवनीं ॥ ध्रु ॥ त्रिभुवनभुवनींपाहातांतुजऐसीनाहीं ॥ चारीश्रमलेंपरंतुनबोलवे
कांहीं ॥ साहीविवादकरितांपडिलेंप्रवाहीं ॥ तेतूंभक्तांलागींपावसिलवलाहीं ॥ २ ॥ प्रसन्नवदनेप्र
सन्नहोसीनिजदासा ॥ क्लेशापासूनिसोडीतोडींभवपाशा ॥ अंबेतुजवांचूनकोणपुरविलआशा ॥ नर
हरितल्लिनझालापदपंकजलेशा ॥ ३ ॥ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ छ ॥
६ आरती ज्ञानदेवाची ॥ ॥ आरतीज्ञानराजा ॥ महाकैवल्यतेजा ॥ सेवितीसाधुसंत ॥ मनुवेधलामा

झा ॥ आ० ॥ ध्रु० ॥ लोपलेंज्ञानजगीं ॥ हितनेणतीकोणी ॥ अवतारपांडुरंग ॥ नावठेविलेंज्ञानी ॥
॥ १ ॥ कनकाचेंताटकरीं ॥ उभ्यागोपिकानारी ॥ नारदतुंबरहो ॥ सामगायनकरी ॥ २ ॥ प्रग
टगुह्यबोले ॥ विश्वब्रह्मचीकेलें ॥ रामाजनार्दनी ॥ पांइठकचीठेले ॥ ३ ॥ ॥ ६ ॥
७ आरतीकृष्णाची ॥ ॥ ओंवाळुआरतीमदनगोपाळा ॥ श्यामसुंदरगळा ॥ वैजयंतीमाळा ॥ धृ० ॥
चरणकमलज्याचेंअतिसकुमार ॥ ध्वजवज्रांकुशब्रिदाचातोडर ॥ १ ॥ नाभिकमळींज्याच्याब्रह्मयाचें
स्थान ॥ ह्रदयींपदकशोभेश्रीवत्सलांछन ॥ २ ॥ मुखकमलपाहातांसूर्याच्याकोटी ॥ मोहियेलेंमान
सकोंदियेलीदृष्टी ॥ ३ ॥ जडितमुकुटज्याचादेदीप्यमान ॥ तेणेंतेजेंकोंदलेंअवघेंत्रिभुवन ॥ ४ ॥
एकाजनार्दनीदेखियेलेंरूप ॥ रूपचिपाहातांतेंव्हांझालेंतद्रूप ॥ ५ ॥ ॥ ६ ॥ ॥ ६ ॥
८ आरतीत्र्यंबकेश्वराची ॥ ॥ जयजयत्र्यंबकराजगिरिजानाथागंगाधराहो ॥ त्रिशूळपाणीशंभोनील
ग्रीवाशशिशेखराहो ॥ वृषभारूढमणिभूषणदशभुजपंचाननशेखराहो ॥ विभूतिमाळाजटासुंदरगज
चर्मांबरधराहो ॥ १ ॥ पडलेंगोहत्येचेंपातकगौतमऋषिच्याशिरींहो ॥ त्याणेंतपमांडिलेंध्यानाआणु
नितुजअंतरींहो ॥ प्रसन्नतूंझालासीस्नानादिधलीगोदावरीहो ॥ औदुंबरमूळींप्रगटेपावनत्रैलोक्यातेंक
रीहो ॥ २ ॥ धन्यकुशावर्ताचामहिमावाचेवर्णूकितीहो ॥ आणिकहीबहुतीर्थेंगंगाद्वारादिकपर्वतीं

हो ॥ स्नानवंदनकरितांत्याचेमहादोषनासतीहो ॥ तुझियादर्शनमात्रेंप्राणीमुक्तितेंपावतीहो ॥ ३ ॥ ब्र
ह्मगिरीचीभावेंज्यालाप्रदक्षिणाजरिघडेहो ॥ जंवजंवकायाकष्टीज्याचेचरणीरुततीरवडेहो ॥ तंवतंवपु
ण्यविशेषत्याचेंकिल्मिषअवघेंझडेहो ॥ केवळतोशिवरूपीकाळत्याचेपांयांपडेहो ॥ ४ ॥ लावु
नियांनिजभजनींसकळाहिपुरविसिमनकामनाहो ॥ संततिसंपतिदेसीअंतींचुकविसियमयातनाहो ॥
शिवाशिवनामस्मरणेंआनंदवाटेमाझ्यामनाहो ॥ गोसावीनंदनविसरेसंसारयातनाहो ॥ जयजयत्र्यंबक
राज० ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
९ आरती मारुती ॥ ॥ सत्राणेउड्डाणहुंकारवदनी ॥ करिडळमळभूमंडळसिंधूजलगगनी ॥ गडगडि
लेंब्रह्मांडधाकेंत्रिभुवनी ॥ सुरवरनीशाचरत्यांझालीपळणी ॥१॥ जयदेवजयदेवजयजयहनुमंता ॥ तुम
चेनीप्रसादेंनभींकृतांता ॥ धृ०॥ दुमदुमिलींपाताळेंउठिलाप्रतिशब्द ॥ थरथरलाधरणीधरमानीलाखे
द ॥ कडकडिलेपर्वतउडगणउच्छेद ॥ रामीरामदासशक्तीचाशोध ॥ २ ॥ ॥ छ ॥ ॥ छ ॥
१० आरती मल्हारीची ॥ ॥ पंचाननहयवाहनसुरभूषितनीळा ॥ खंडामंडितदंडितदानवअवली
ळा ॥ मणिमल्लमर्दुनियांजोशीरपीवळा ॥ हीरेकंकणबासिंगेंसुमनाच्यामाळा ॥ १॥ जयदेवजयदेवजय
श्रीमल्हारी ॥ वारीदुर्जनवारीनिंदकअपहारी ॥ जय० ॥ धृ० ॥ सुरवरसंवरवरदेमजलागींदेवा ॥ नानाना

मेंगाइनहीतुमचासेवा ॥ अगणितगुणगावयाहोटतहेदेवा ॥ फणिवरशिणलाकींतीनरपामरकेवा ॥
॥ १ ॥ रघुवरस्मरणींशंकरत्हदयींनीवाला ॥ तोहामल्लांतकअवतारझाला ॥ यालागींआवडीभावेंव
र्णीला ॥ रामीरामदासाजिवलगभेटला ॥ ३ ॥ जय० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥
॥ ११ ॥ आरती दत्तात्रयाची ॥ ॥ त्रिगुणत्रयमूर्तीदत्तहाजाणा ॥ त्रिगुणअवतारत्रैलोक्यराणा ॥
नेतीनेतीशब्दनयेअनुमाना ॥ अखंडसमाधीध्यानमुनिजना ॥ १ ॥ जयदेवजयदेवजयजयश्रीदत्ता ॥
आरतीओंवाळूंहरिसंसारव्यथा ॥ जयदेव० ॥ धृ० ॥ सबाहिआभ्यंतरींतूंएकदत्त ॥ अभाग्यासींकै
सीनकळेहीमात ॥ पराहीपरतलीतेथेंकैंचाहाहेत ॥ जन्ममरणाचाहीपुरलासेअंत ॥ जय० ॥ २ ॥ द
त्तदत्तऐसेंलागलेंध्यान ॥ हरपलेंमनझालेंउन्मन ॥ मीतूंपणाचीझालबिाळवण ॥ एकजनार्दनीश्री
दत्तजाण ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥
१२ आरतीभुवनसुंदराची ॥ ॥ आरतीभुवनसुंदराची ॥ इंदिरावरामुकुंदाची ॥ धृ ॥ पद्मसमपादयुग्म
रंगा ॥ ओवाळणीहोतिभृंगा ॥ नखमणिस्त्रवताहेगंगा ॥ जेकांत्रिविधतापभंगा ॥ वर्तुलगुल्फभ्राज
मानें ॥ किंकिणीक्वणितनादघणघणितवाक्यवरझुणितनेपुरेंझननमंजिराचीं ॥ झननध्वनिमंजिराची ॥
आरतीभुवनसुंदराची ॥ इंदि० ॥ १ ॥ पीतपटहटकततवर्णी ॥ कांचीनितंबस्वस्थानी ॥ ना

भीचीअगाधहोकरणी ॥ विश्वजनकाचिजेजननी ॥ त्रिवलीललितउदरशोभा ॥ कंबुगळांमाळविलं
बितझळाळकौस्तुभसरळबाहुश्रीवत्सतरलमणीमरळकंकणाची ॥ प्रीतबहुजडितकंकणाची ॥ आर
तीभुवन० ॥ २ ॥ इंदुसमहास्यकुंदरदना ॥ अधरारुणार्कबिंबवदना ॥ पाहातांभ्रांतिपडेमदना ॥ स
जलमेघाब्धिदैत्यदलना ॥ झळकतमकरकुंडलाभा ॥ कुटिलकुंतळीमयूरपत्राबाळिवेष्टिलेंतिलकभा
ळिंशरिरझळाळितकृष्णकस्तुरीची ॥ अक्षताकाळिकस्तुरीची ॥ आरतीभुवन० ॥ ३ ॥ कल्पद्रुमात
ळींमूर्ती ॥ सौदामिनीकोटिदीप्ती ॥ गोपीगोपवलयभवती ॥ त्रिविष्टपपुष्पवृष्टिकरिती ॥ मंजुळमधु
रमुरलिनादें ॥ चकितगंधर्वचकितअप्सरासुरागिरिधरासिगाठनिधराधराकर्पूरआरतीनेंप्रेमयुक्तसाची ॥
आरतीओंवाळितसाची ॥ आरतीभुवन० ॥ ४ ॥ वृंदावनिंचेयेहरणी ॥ सखेश्रीकृष्णमायबहिणी ॥
श्रमलोंभवाब्धिचेफिरणी ॥ आतांठावदेइंचरणीं ॥ अहोहेपूर्णपुण्यश्लोका ॥ नमितोंचरणाशरणमीक
रुणायेउंदेवृषाणपाणीकृष्णनेणतेबाळआपुलेंराखिलाजत्याची ॥ दयानिधेराखिलाजत्याची ॥ आर
तीभुवनसुंदराची ॥ ५ ॥ ॥ ❀ ॥ ॥ ❀ ॥ ॥ ❀ ॥ ॥ ❀ ॥
१२ आरतीजगदंबेची ॥ ॥ अश्विनशुद्धपक्षींअंबाबैसलिसिंहासनीहो ॥ प्रतीपदेपासूनिघटस्थाप
नातीकरूनिहो ॥ मूळमंत्रजपकरुनिभवंतेरक्षकठेवूनिहो ॥ ब्रह्माविष्णुरुद्रआइचेंपूजनकरूनिहो ॥ उ

दोबोलाउदोअंबाबाईमाउलीचाहो ॥ उदोकारेंगर्जतीकायमहिमावर्णूतिचाहो ॥ ध्रु० ॥ १ ॥ द्विती
येचेदिवशींमिळतीचौसष्टयोगिनीहो ॥ सकळांमध्येंश्रेष्ठपरशुरामाचीजननीहो ॥ कस्तुरीमळवटभांगीं
शेंदुरभरुनीहो ॥ उदोकारेंगर्जतीसकळचामुंडामिळुनीहो ॥ उदो० ॥ २ ॥ तृतीयेचेदिवशींअंबेशृं
गारमांडिलाहो ॥ मळवटपातळचोळीकंठींमुक्ताफळाहो ॥ कंठींचींपदकेंकांसेपीतांबरपींवळाहो ॥
अष्टभुजामिरविसीअंबेसुंदरादिसेलीलाहो ॥ उदो० ॥ ३ ॥ चतुर्थीच्यादिवशींविश्वव्यापकजननी
हो ॥ उपासकांलागींपाहासीअंतःकरणीहो ॥ पूर्णकृपाहोसीजगन्मातेमनमोहिनीहो ॥ भक्तांच्यामा
उलीसुरतेयेतीलोटांगणींहो ॥ उदो० ॥ ४ ॥ पंचमीचेदिवसींव्रतउपांगललिताहो ॥ अर्घ्यपाद्यपूज
नेतुजलाभवानीस्तवितीहो ॥ रात्रीच्यासमयींतींकरितीजागरणहरिकथाहो ॥ आनंदेंप्रेमतेंआलेंसद्भावें
क्रीडतांहो ॥ उदो० ॥ ५ ॥ षष्ठीचेदीवसींभक्तांआनंदवर्तलाहो ॥ घेउनिदिवट्याहस्तींहर्षेंगोंधळ
घातलाहो ॥ कवडीएकअर्पितांदेसीहारमुक्ताफळाहो ॥ जोगवामागतांप्रसन्नझालीभक्तकुळाहो ॥
उदो० ॥ ६ ॥ सप्तमीचेदिवशींसप्तशृंगगडावरीहो ॥ तेथेंतूंनांदसीभंवतीपुष्पपारिमळाहो ॥ जाइजू
ईशेवतीपूजारेखियेलीबरीहो ॥ भक्तसंकटींपडतांझेलुनघेसीवरचेवरीहो ॥ उदो० ॥ ७ ॥ अष्टमीचे
दिवशींअष्टभुजानारायणीहो ॥ सत्याद्रीपर्वतींपाहिलिउभीजगज्जननीहो ॥ मनमाझेंमोहिलेंशरणआलों

तुजलागुनीहो ॥ स्तनपानदेउनीकेलेंसुखिअंतःकरणीहो ॥ उदो॰ ॥ ८ ॥ नवमीचेदिवशींनवदिव
सांचेंपारणेंहो ॥ सप्तशतीजपहोमहवनेंसद्भक्तीकरुनीहो ॥ षड्रसअन्नेंनैवेद्यासीअर्पिलींभोजनीहो ॥
आचार्यब्राह्मणातृप्तकेलेंत्वांकृपेंकरुनीहो ॥ उदो॰ ॥ ९ ॥ दशमीचेदीवशींनिघेअंबासिमोल्लंघनीहो ॥
सिंहारूढकरींसबळतींशस्त्रेंअंबेत्वांघेउनीहो ॥ शुंभनिशुंभादिकराक्षसांकितिमारिसीरणींहो ॥ विप्रारा
मदासाआश्रयदिधलातोचरणीहो ॥ उदो॰ ॥ १० ॥ ॥ समाप्त ॥ ॥ छ ॥ ॥ छ ॥

॥ ११९ ॥ ॥ प्रार्थना प्रारंभः ॥

प्रार्थनाप्रारंभः ॥ ॥ घालिनलोटांगणवंदिनचरणडोळ्यानेंपाहिनरूपतुझें ॥ प्रेमेआलिंगिनअनंतपू
जनभावेंओंवाळिनह्मणेनामा ॥ १ ॥ त्वमेवमातापितात्वमेव,त्वमेवबंधुश्चसखात्वमेव ॥ त्वमेवविद्याद्र
विणंत्वमेव ॥ त्वमेवसर्वंममदेवदेव ॥ २ ॥ कायेनवाचामनसेंद्रियैर्वाबुध्यात्मनावाप्रकृतिस्वभावात् ॥
करोमियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयामि ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥ ॥

॥२०८॥ ॥ १५ ॥ अष्टक प्रारंभः ॥ ॥ अच्युतंकेशवंरामनारायणंकृष्णदामोदरंवासुदेवंहरिं ॥ श्रीधरंमाधवं
गोपिकावल्लभंजानकीनायकंरामचंद्रंभजे ॥ १ ॥ अच्युतंकेशवंसत्यभामाधवंश्रीधरंराधिकाराधनम् ॥
इंदिरामंदिरंचेतसासुंदरंदेवकीनंदनंनंदजेसंदधे ॥ २ ॥ विष्णवेजिष्णवेशंखिनेचक्रिणेरुक्मिणीरागिणे
जानकीजानये ॥ वल्लवीवल्लभायाजितायात्मनेकंसविध्वंसिनेवंसिनेतेनमः ॥ कृष्णगोविंदहेरामनारायण
श्रीपतेवासुदेवार्चितश्रीनिधे ॥ अच्युतानंतहेमाधवाधोक्षजद्वारकानायकद्रौपदीरक्षकः ॥ राक्षसःक्षोभि
तःसीतयाशोभितोदंडकारण्यभूपुण्यताकारणं ॥ लक्ष्मणेनार्चितोवानरैःसेवितोगस्तिनापूजितोरा
घवः पातुमां ॥ धेनुकानिष्टकृद्द्वेषिणांकेशिहाकंसहृद्वंशिकावादकः ॥ पूतनाशोषितोसूरजालेरव
नोबालगोपालकःपातुमांसर्वदा ॥ ६ ॥ वैद्युतद्योतकासंस्फुरद्वाससाप्रावृडंभोववत्प्रोल्लसद्विग्रहे ॥
॥ ७ ॥ कुंचितैःकुंतलैर्भ्राजमानाननंरत्नमौलिंलसत्कुंडलंगंडयोः ॥ हारकेयूरिणंकिंकिणीजाज्वलंकि ॥२०८॥
किणीमंजुलस्यामलंमावये ॥ ८ ॥ अच्युतःस्याष्टकंयःपठेत्प्रत्यहंसर्वतःसन्नहम् ॥ सर्वतःसुंदरंकर्तुंवि
श्वंभरस्तस्यवश्योहरिर्जायतेसत्वरं ॥ ९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ११७ ॥ ॥ विडा रामाचा व श्रीकृष्णाचा प्रारंभ ॥

दानानिकुर्वंति ॥ शक्तौसत्यां ॥ ततःकर्त्राप्रार्थिताःसर्वेबांधवाःसंबंधिनश्चत्रीन्धर्मोदकांजलीन्एकैकं
वांजलिंप्रेतोद्देशेनदद्युः ॥ ततःपुत्रादीनांयथाचारंश्मश्रुवपनंनखच्छेदादिकंकार्यं ॥ कुक्षौवर्ज्यं ॥
ततःसर्वेसगोत्रायथादेशाचारातिलामलकादिनास्नात्वा ॥ आचम्यप्राणायामंकृत्वादेशकालौस्मृत्वा ॥
प्राचीनावीती ॥ अ० गो० अ० प्रे० प्रे० मृ० दशमेन्हिदाहजनिततृषोपशमनार्थंएषतेति
लतोयांजलिरुप० ॥ अश्मानंविसर्जयेत् ॥ स्थलत्यागः ॥ सव्येनस्नात्वाशुष्कशुक्लवासोधृत्वागृ
हंगत्वा ॥ भोजनसमीपेदीपंवर्जयेत् ॥ क्षुधानिवारणार्थंसर्वेअन्नपिंडंविसर्जयेत् ॥ उदकुंभंपयःकुंविस
र्जयेत् ॥ भोजनस्छानेविपर्यासनवर्जं ॥ सर्वेबांधवैःभुंजीरंनिति ॥ ॥ इतिदशमदिनविधिःसमाप्तः ॥
श्रीगणेशायनमः ॥ अथएकादशदिनप्रारंभः ॥ ॥ स्नात्वा ॥ ॥ आचम्यप्राणानायम्य ॥
सर्वांतर्यामिप्रेतपापापहर्तामोक्षदातामहाविष्णवेनमः ॥ विष्णुर्विष्णुःश्रीमद्भगवतो० ॥ प्राचीनावीती ॥
अमुकगोत्रस्यअमुकप्रेतस्यप्रेतत्वनिवृत्योत्तमलोकप्राप्त्यर्थंमृताहात्एकादशेहनिएकादशविधिंकरिष्ये ॥

सव्यं ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अ० गो० अ० प्रे० प्रे० मृ० एकादशेहनिदशरात्रि सूतकनिवृत्त्यर्थस्नानसंध्याजपहोमांतरितशरीरशुध्यर्थंब्राह्मणद्वारापंचगव्यमीलनंकरिष्ये ॥ ताम्रपात्रे ॥ गायत्र्यागोमूत्रं ॥ गंधद्वारेतिगोमयं ॥ आप्यायस्वेतिक्षीरं ॥ दधिक्राव्णोइतिदधि ॥ घृतंमिमिक्ष इतिघृतं ॥ देवस्यत्वेतिकुशोदकं ॥ आपोहिष्ठेतिमंथयेत् ॥ ॐ इरावती० ॥ ॐ इदंविष्णुर्वि० ॐ मा नस्तोकेत० ॐ त्र्यंबकंय० ॥ ॐ ब्रह्मजज्ञानंप्र० ॥ प्रणवेनालोड्य ॥ प्रणवेनाभिमंत्र्य ॥ आचम्य प्राणानायम्य देशकालौस्मृत्वादशरात्रिसूतकनिवृत्त्यर्थस्नानसंध्यांतरितजपहोमांतरितशरीरशुध्यर्थंपंच गव्यप्राशनमहंकरिष्ये ॥ यत्त्वगस्थिगतंपापंदेहेतिष्ठतिमामके ॥ प्राशनंपंचगव्यस्यदहत्यग्निरिवेंध नं ॥ ओं प्राश्य ॥ आचम्यप्राणानायम्यदेशकालौस्मृत्वा ॥ यज्ञोपवीतंधारयित्वा ॥ देशकालौ स्मृत्वाप्राचीनावीती ॥ अमुकगो० अ० प्रे० प्रे मृ० एकादशेहनिममपितुःजन्मप्रभृतिएतावंतका लपर्यंतंसमस्तपापक्षयगोप्रदानमहंकरिष्ये ॥ सव्यं ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अ० गो० अ० प्रे० प्रे० मृ० एकादशेहनिममपितुःजन्मप्रभृतिएतावंतकालपर्यंतंनानाविधपापक्षयार्थं ब्राह्मणायतिलपात्रदानमहंकरिष्ये ॥ सव्यं ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अ० गो० अ० प्रे० प्रे० मृ० एकादशेहनिममपितुःअशीपत्रनरकदोपनिवारणार्थंब्राह्मणायकांस्यपात्रदानमहंकरिष्ये

॥ सव्यं ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अ० गो० अ० प्रे० प्रे० मृ० एकादशेहनिपूर्वं संकल्पितानिएतानिगवादिदशदानानितन्मध्येकानिचित्प्रत्यक्षाणिकानिचित्द्रव्यद्दाराइदानीमहंकरिष्ये ॥ सव्यं ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अ० गो० अ० प्रे० प्रे० मृताहात्एकादशेहनिममपितुःपूर्वसंकल्पितप्रायश्चित्तद्रव्यंनानानामगोत्रेभ्योब्राह्मणेभ्यः दातुमहमुत्सृज्ये ॥ तेनश्रीपापापहामोक्षदातामहाविष्णुः प्रीयतामिति ॥ सव्यं ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अमु० गो० अ० प्रे० प्रे० मृ० एकादशेहनिममपितुः यथालाभयथाशक्तिदीपादिउपदानानितन्मध्येप्रत्यक्षाणितन्मध्येद्रव्यद्दाराइदानीमहंकरिष्ये ॥ ॥ अथदशदानानि ॥ मदनरत्ने ॥ उत्क्रांत्यादीनिदानानिदशदद्यान्मृतस्यतु ॥ गोभूतिलहिरण्याज्यंवासोधान्यंगुडानिच ॥ रौप्यंलवणमित्यादिदशदानान्यनुक्रमात् ॥ एतानिदशदानानिनराणांमृत्युजन्मनोः ॥ कुर्यादभ्युदयार्थंचप्रेतेपिहिपरत्रचेतिहेमाद्रौ ॥ तत्रादौगोदानं ॥ ॥ यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी ॥ विश्वरूपधरोदेवःप्रीयतामनयागवा ॥ १ ॥ भूमिदानं ॥ सर्वेषामाश्रयाभूमिर्वराहेणसमुद्धृता ॥ अनंतसस्यफलदाअतःशांतिंप्रयच्छमे ॥ २ ॥ तिलदानं ॥ महर्षिगोत्रसंभूताःकाश्यपस्यतिलाःस्मृताः ॥ तस्मादेषांप्रदानेनपितृपापंव्यपोहतु ॥ ३ ॥ हिरण्यदानं ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनंतपुण्यफलदमतःशांतिंप्र

यच्छमे ॥ ४ ॥ आज्यदानं ॥ कामधेनोः समुद्भूतंसर्वक्रतुषुसंस्थितं ॥ देवानामाज्यमाहारअतः
शांतिंप्रयच्छमे ॥ ५ ॥ वस्त्रदानं ॥ शीतवातोष्णसंत्राणंलज्जायारक्षणंपरं ॥ देशालंकरणंवस्त्रम
तःशांतिंप्रयच्छमे ॥ ६ ॥ धान्यदानं ॥ सर्वदेवमयंधान्यंसर्वोत्पत्तिकरंमहत् ॥ प्राणिनांजीव
नोपायमतःशांतिंप्र यच्छमे ॥ ७ ॥ गुडदानं ॥ गुडमिक्षुरसोद्भूतंमंत्राणांप्रणवंयथा ॥ दानेनानेनमेत
स्यपरालक्ष्मीस्थिरागृहे ॥ ८ ॥ रौप्यदानं ॥ प्रीतिर्यतःपितॄणांचविष्णुशंकरयोःसदा ॥ शिवनेत्रोद्भवं
रूप्यमतःशांतिंप्रयच्छमे ॥ ९ ॥ लवणदानं ॥ यस्मादन्नरसाःसर्वेनोत्कृष्टालवणंविना ॥ शंभोःप्रीति
करंयस्मादतःशांतिंप्रयच्छमे ॥ १० ॥ इतिदशदानानि ॥ अथउपदानानि ॥ दीपदानं ॥ दीपोज्ञान
प्रदोनित्यंदेवतानांप्रियःसदा ॥ दानेनास्यभवेत्सौख्यंशांतिर्मेवांछितंफलं ॥ १ ॥ यज्ञोपवीतदानेनजा
यतेब्रह्मवर्चसी ॥ तस्मात्तानिप्रदेयानिब्राह्मणेभ्योविपश्चिते ॥ २ ॥ माषदानं ॥ यस्मान्मधुवनेकालेवि
ष्णुदेहसमुद्भवाः ॥ पितॄणांतृप्तिदामाषाअतःशांतिंप्रयच्छमे ॥ ३ ॥ तैलदानं ॥ तैलंपुष्टिकरंनित्यमा
युर्वृद्धिकरंपरं ॥ अमांगल्यहरंश्रीदमतःशांतिंप्रयच्छमे ॥ ४ ॥ पुष्पदानं ॥ मनोहराणिपुष्पाणिमहादेव
प्रियाणिच ॥ अतस्तेषांप्रदानेनममसंतुसुराःप्रियाः ॥ ५ ॥ फलदानं ॥ मनोहराणिरम्याणिनित्यंस्वा
दुकराणिच ॥ फलानांसंप्रदानेनसंततिस्त्वमलामम ॥ ६ ॥ तांबूलदानं ॥ सोपस्करंचतांबूलंसर्वदा

मंगलप्रदं ॥ प्रियंचैवतुदेवानांसौगंध्यंवदनेस्तुमे ॥ ७ ॥ उपानहौप्रदत्तौमेकंटकादिनिवारणे ॥ सर्व
मार्गेषुसुखदौअतःशांतिंप्रयच्छमे ॥ ८ ॥ छत्रदानं ॥ इहामुत्रातपत्रंचसूर्यरश्मिनिवारकं ॥ त्वत्प्रीत
येमंयादत्तमतःशांतिंप्रयच्छमे ॥ ९ ॥ दर्पणदानं ॥ कंवलदानं ॥ सित्थस्छालीदानं ॥ विष्णुमू
र्तिदानं ॥ इतिदानानि ॥ ॥ अथवृषोत्सर्गप्रारंभः ॥ ततःकर्त्तावृषोत्सर्गंकुर्यात् ॥ एकादशे
न्हिप्रेतस्ययस्यनोत्सृज्यतेवृषः ॥ प्रेतत्वंसुस्थिरंतस्यकृतैःश्राद्धशतैरपि ॥ १ ॥ अत्रनाचार्यवरणंकाम्य
वृषोत्सर्गवत्किंतुस्वयमेवकुर्यात् ॥ आचम्यप्राणानायम्यदेशकालौस्मृत्वाप्राचीनावीतीअमुकगोत्रस्य
अमुकप्रेतस्यप्रेतत्वनिवृत्त्योत्तमलोकप्राप्त्यर्थंमृताहात्एकादशेहनिवृषोत्सर्गंकरिष्ये ॥ ॥ इतिसंकल्प्य॥
अध्वरनामानमग्निंप्रतिष्ठाप्य ॥ अन्वाधानंकुर्यात् ॥ अस्मिन्नन्वाहितेग्नावित्यादिआघारावाज्येनेत्यंतमु
क्त्वा ॥ अत्रप्रधानं ॥ रुद्रंचरुणायक्ष्ये ॥ सोमंपायसेनयक्ष्ये ॥ इंद्रंयावकेनयक्ष्ये ॥ शेषेणस्विष्टकृतमि
त्यादिपरिसमूहनादिपूर्णपात्रनिधानांतंविधायनिर्वापादिक्रमेणहविःश्रपंसंपाद्यजुहुयात् ॥ कद्रुद्रायेतिअ
घोरप्रस्कण्वोरुद्रोगायत्री ॥ रौद्रचरुहोमेविनियोगः ॥ ॐ कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे ॥ वोचे
मशंतमंहृदेस्वाहा ॥ रुद्रायेदंनमम ॥ सोमोधेनुंगौतमःसोमस्त्रिष्टुप् ॥ सोमपायसहोमेविनियोगः ॥

ॐ सोमोधेनुंसोमोअर्वंतमाशुंसोमोवीरंकर्मण्यंददाति ॥ सादन्यंविदथ्यंसभेयंपितृश्रवणंयोददाशतस्मै
स्वाहा ॥ सोमायेदंनमम ॥ इंद्रंवोमधुच्छंदाइंद्रोगायत्री ॥ ऐंद्रयावकहोमेविनियोगः ॥ ॐ इंद्रंवोवि
श्वतस्परिहवामहेजनेभ्यः ॥ अस्माकमस्तुकेवलः स्वाहा ॥ इंद्रायेदंनमम ॥ एभिर्मंत्रैर्यथाक्रमंहुत्वा
स्विष्टकृतादिमार्जनांतंकुर्यात् ॥ केचिद्रुद्रायस्वाहेतिअनादिनाममंत्रैरेवहोममाहुः ॥ ततोद्विहायनवा
जीववत्सायाःपयस्विन्याःपुन्नीलादिवर्णऽलोहितायसुवर्णेनमुखेचपांडुरः ॥ श्वेतःखुरविषणांम्पांस
नीलोवृषभउच्यतइतिलाक्षितंयथालाभंवाअनायततश्चतस्त्रः ॥ एकंवाएकवर्षाधिकंवत्सतरीमानीयगोस
हितवृषस्यमंत्रैरभिषेकः ॥ आपोहिष्ठेतितिसृणांसिंधुद्वीपआपोगायत्री ॥ वृषभवत्सतर्यभिषेकेविनियो
गः ॥ ॐ आपोहिष्ठा• ॥ ऋ० ३ ॥ कयानश्चित्रआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता
कस्त्वासत्योमदानांमाहिष्ठोमत्सदंधसः ॥ दृळ्हाचिदारुजेवसु ॥ अभीषुणःसखीनामविताजरि
तॄणां ॥ शतभंवास्यूतिभिः ॥ वृषवत्सतर्यैकवस्त्रगंधाक्षतमाल्यादियथाशक्तिअलंकृत्य ॥ ऋषभमिति
सूक्तस्यऋषभऋषभोविराट् ॥ अनुष्टुप्छंदः ॥ ॥ अंत्यामहापंक्तिः ॥ ॥ ऋषभस्यउपस्थानेविनियोगः

ऋषभंमासमानानांसपत्नानांविषासहिं ॥ हंतारंशत्रूणांकृधिविराजंगोपतिंगवां ॥ अहमस्मिसपत्नहेंद्र
इवारिष्टोअक्षतः ॥ अधःसपत्नामेपदोरिमेसर्वेआभिष्ठिताः ॥ अत्रैववोपिनह्यांस्युभेआर्त्नीइवज्यया ॥
वाचस्पतेनिषेधेमांन्यथामदधरंवदान् ॥ अभिभूरहमागमंविश्वकर्मेणधाम्ना ॥ आवश्चित्तमावोव्रतमा
वोहंसमितिंदधे ॥ योगक्षेमंवंआदायाहंभूयासमुत्तमआवोमूर्धानमक्रमी ॥ अधस्पदान्मउद्वदतमंडूका
ऽइवोदकान्मंडूकाउदकादिव ॥ ऋ० ५ ॥ इतिसूक्तंपंचर्चं ॥ अंजलिपुटोजपेत् ॥ ततोवृषं
प्रदक्षिणंअग्निपूर्वंतआनीय ॥ दक्षिणबाहुमूलेस्फिचिंभस्मनात्रिशूलाकारंअंकयित्वा ॥ तदुपरितप्तलो
हेनकारयेत् ॥ ततःप्रांचमुत्सृजेत् ॥ व्रजंतमनुमंत्रयीत ॥ एतंयुवानमितिमंत्रस्ययाज्ञवल्क्यऋषिः ॥
ऋषभोदेवतात्रिष्टुप्छंदः ॥ वृषोत्सर्गेविनियोगः ॥ ॐ एतंयुवानंपतिवोदभादामितेनक्रिडंतिश्चरतिप्रि
येणा ॥ मावःशाप्रजनुषासुभागारायस्पोषेणसामिषादमे ॥ शांताप्रथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयन्नो
अस्तु ॥ शिवादिशःप्रदिशउद्दिशोनआपोविद्युतःपरिपांतुसर्वतः शांतिः शांतिः शांतिः ॥ ॥ सर्व
तोव्रजस्वेतिब्रूयात् ॥ ततोवृषंपूर्वाभिमुखंकृत्वा ॥ कद्रुद्रायेतिनवर्चस्यसूक्तस्यअघोरःकण्वोगायत्री ॥
पूर्वादिउपस्थानेवि० ॥ कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे ॥ वोचेमशंतमंहृदे ॥ यथानोअदितिःकर

तपश्वेनृभ्योयथागवे ॥ यथानोकायरुद्रियं ॥ यथानोमित्रोवरुणोयथारुद्रश्चिकेतति ॥ यथाविश्वेसजोषसः ॥
गाथपतिंमेधपतिंरुद्रंजलाषभेषजं॥ तच्छंयोःसुम्नमीमहे ॥ यःशुक्रइवसूर्योहिरण्यमिवरोचते ॥ श्रेष्ठोदेवा
नांवसुः ॥१॥ शंनःकरत्यर्वतेसुगंमेषायमेष्ये ॥ नृभ्योनारिभ्योगवे ॥ अस्मेसोमश्रियमधिनिधेहिशतस्यनृ
णां ॥ महिश्रवस्तुविनृम्णं ॥ मानःसोमपरिबाधोमारातयोजुहुरंत ॥आनइंदोवाजेभज ॥ यास्तेप्रजाअमृ
तस्यपरस्मिंधामन्नृतस्य ॥ मूर्धानाभासोमवेनआभूषंतीःसोमवेदः ॥ २ ॥ एतत्सूक्तांतेगोभिःसहतृणंभक्ष
जलंपिबयथासुखंक्रीडस्व ॥ ततःदक्षिणाभिमुखंकृत्वा ॥ इमारुद्रायेतिसूक्तस्यकुत्सोरुद्रोजगती ॥ अंत्ये
त्रिष्टुप् ॥ दक्षिणाउपस्थानेविनियोगः ॥ ॐ इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः ॥ य
थाशमसद्विपदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्ननातुरं ॥ मृळानोरुद्रोतनोमयस्कृधिक्षयद्वीरायनमसाविधेम
ते ॥ यच्छंचयोश्चमनुरायेजेपितातदश्यामतवरुद्रप्रणीतिषु ॥ अश्यामतेसुमतिंदेवयज्ययाक्षयद्वीरस्यतव
रुद्रमीढ्वः ॥ सुम्नायन्निद्विशोअस्माकमाचरारिष्टवीराजुहवामतेहविः ॥ त्वेषंवयंरुद्रंयज्ञसाधंवंकुंकविम
वसेनिह्वयामहे ॥ आरेअस्मद्दैव्यंहेळोअस्यतुसुमतिमिद्वयमस्यावृणीमहे ॥ दिवोवराहमरुषंकपर्दिनंत्वे

षरूपंनमसानिव्हयामहे ॥ हस्तेबिभ्रद्भेषजावार्याणिशर्मवर्मछर्दिरस्मभ्यंयंसत् ॥ १ ॥ इदंपित्रेमरुतामु
च्यतेवचःस्वादोःस्वदीयोरुद्रायवर्धनं ॥ रास्वाचनोअमृतमर्तभोजनंत्मनेतोकायतनयायमृळ ॥ मानो
महांतमुतमानोअर्भकंमानउक्षंतमुतमानउक्षितं ॥ मानोवधीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः
मानस्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदामि
त्वाहवामहे ॥ उपतेस्तोमान्पशुपाइवाकरंरास्वापितर्मरुतांसुम्नमस्मे ॥ भद्राहितेसुमतिर्मृळयत्तमाथा
वयमवइत्तेवृणीमहे ॥ आरेतेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेतेअस्तु ॥ मृळाचनोअधिचब्रूहिदेवा
धाचनःशर्मयच्छद्विबर्हाः ॥ अवोचामनमोअस्माअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वान् ॥ तन्नोमित्रोवरु
णोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः ॥ २ ॥ एतत्सूक्तांतेगोभिःसहतृणंभक्षजलंपिबयथासुखंक्रीड
स्व ॥ ततःपश्चिमाभिमुखंकृत्वा ॥ आतेपितरितिसूक्तस्यगृत्समदोरुद्रास्त्रिष्टुप् ॥ पश्चिमादिउपस्थाने
विनियोगः ॥ ॐ आतेपितर्मरुतांसुम्नमेतुमानःसूर्यस्यसंदृशोयुयोथाः ॥ अभिनोवीरोअर्वतिक्षमेतप्रजा
येमहिरुद्रप्रजाभिः ॥ त्वादत्तेभीरुद्रशंतमेभिःशतंहिमाअशीयभेषजेभिः ॥ व्यस्मद्द्वेषोवितरंव्यंहोव्य

मीवाश्चातयस्वाविषूचीः ॥ श्रेष्ठोजातस्यरुद्रश्रियासितवस्तमस्तवसांवज्रबाहो ॥ पर्षिणःपारमंहसःस्व
स्तिविश्वाअभीतीरपसोयुयोधि ॥ मात्वारुद्रचुक्रुधामानमोभिर्मादुष्टुतीवृषभमासहूती ॥ उन्नोवीराँअर्प
यभेषजेभिर्भिषक्तमंत्वाभिषजांशृणोमि ॥ हवीमभिर्हवतेयोहविर्भिरवस्तोमेभीरुद्रंदिषीय ॥ ऋदूदरःसु
हवोमानोअस्यैबभ्रुःसुशिप्रोरीरधन्मनायै ॥३॥ उन्मामंदवृषभोमरुत्वान्त्वक्षीयसावयसानाधमानं ॥ घृ
णीवच्छायामरपाअशीयाविवासेयंरुद्रस्यसुम्नं ॥ क्व स्यतेरुद्रमृळयाकुर्हस्तोयोअस्तिभेषजोजलाषः ॥
अपभर्तारपसोदैव्यस्याभीनुमावृषभचक्षमीथाः ॥ प्रबभ्रवेवृषभायश्वितीचेमहोमहीसुष्टुतिमीरयामि ॥
नमस्याकल्मलीकिनंनमोभिर्गृणीमसित्वेषंरुद्रस्यनाम ॥ स्थिरेभिरंगैःपुरुरूपउग्रोबभ्रुःशुक्रेभिःपिपिशे
हिरण्यैः ॥ ईशानादस्यभुवनस्यभूरेर्नवाउयोषद्रुद्रादसुर्यं ॥ अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंयजतं
विश्वरूपं ॥ अर्हन्निदंदयसेविश्वमभ्वंनवाओजीयोरुद्रत्वदस्ति ॥ २ ॥ स्तुहिश्रुतंगर्तसदंयुवानंमृगं
नभीममुपहत्नुमुग्रं ॥ मृळाजरित्रेरुद्रस्तवानोन्यंतेअस्मन्निवपंतुसेनाः ॥ कुमारश्चित्पितरंवंदमानंप्रति

नानामरुद्रोपयंतं ॥ भूरेर्दातारंसत्पतिंगृणीषेस्तुतस्त्वंभेषजारास्यस्मे ॥ यावोभेषजामरुतःशुचीनियाशं
तमावृषणोयामयोभु ॥ यानिमनुरवृणीतापितानस्ताशंचयोश्चरुद्रस्यवश्मि ॥ परिणोहेतीरुद्रस्यवृज्याःप
रित्वेषस्यदुर्मतिर्महीगात् ॥ अवस्थिरामघवभ्यस्तनुष्वमीढ्वस्तोकायतनयायमृळ ॥ एवाबभ्रोवृषभचे
कितानयथादेवनहृणीषेनहंसि ॥ हवनःश्रुन्नोरुद्रेहबोधिबृहद्वदेमाविदथेसुवीराः ॥ ३ ॥ एतत्सूक्तांतेगो
भिःसहतृणंभक्षजलंपिबयथासुखंक्रीडस्व ॥ उदङ्मुखंकृत्वा ॥ इमारुद्रायेतिवसिष्ठोरुद्रोजगती ॥ अं
त्येत्रिष्टुप् ॥ उत्तरादिउपस्थानेविनियोगः ॥ इमारुद्रायस्थिरधन्वनेगिरःक्षिप्रेषवेदेवायस्वधाव्ने ॥
अषाळ्हायसहमानायवेधसेतिग्मायुधायभरताशृणोतुनः ॥ सहिक्षयेणक्षम्यस्यजन्मनःसाम्राज्येनदिव्य
स्यचेतति ॥ अवन्नवंतीरुपनोदुरश्चरानमीवोरुद्रजासुनोभव ॥ यातेदिद्युदवसृष्टादिवस्परिक्ष्मयाचरतिप
रिसावृणक्तुनः ॥ सहस्रंतेस्वपिवातभेषजामानस्तोकेषुतनयेषुरीरिषः ॥ मानोवधीरुद्रमापरादामातेभूम
प्रसितौहीळितस्य ॥ आनोभजबर्हिषिजीवशंसेयूयंपातस्वस्तिभिःसदानः ॥ १ ॥ एतत्सूक्तांते
गोभिःसहतृणंभक्षजलंपिबयथासुखंक्रीडस्व ॥ ततःपुच्छेप्रेतस्यनामगोत्राद्युच्चार्यतर्पणंकुर्यात्इतिकेचि

त् । ततोनुरूपंआमान्नत्रयंसदक्षिणंदद्यात् ॥ ततोवृषोत्सर्गसंपूर्णतासिध्यर्थंतिलानुदकुंभंगांवासोहिरं
ण्यंचयथाशक्तिदक्षिणांदद्यात् ॥ पतिपुत्रवत्याःसुवासिन्यानवृषोत्सर्गः ॥ तत्स्थानेएकापयस्विनीगौ
र्देया ॥ ॥ इति वृषोत्सर्ग विधिः समाप्तः ॥ ॥ ॥ ततोअद्येत्यादिपिंडप्रवाहणं
स्नानांतेनएकोद्दिष्टप्रोक्तेनविषमदिनंकुर्यात् ॥ शिमस्वमीनिर्मतेनैतत् ॥ ततोमहैकोद्दिष्टं ॥ अद्येत्या
दि अ० गो० अ० प्रे० प्रेतत्वानिवृत्त्योत्तमलोकप्राप्तयेएकादशेहनिमहैकोदिष्टंकरिष्ये ॥ इतिसंक
ल्प्य ॥ द्विजभावेशुचौदेशेगोमयेनोपलिप्य ॥ व्याहृतिभिरग्निंप्रतिष्ठाप्य ॥ परिसमुह्यपरिस्तीर्यपर्युक्ष्य
गंधादिभिरभ्यर्च्य ॥ अग्निसमीपेदेशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अ० गो० अ० प्रे० प्रे०
मृ० एकादशेन्हिअग्नावेकोद्दिष्टश्राद्धंकरिष्ये ॥ अ० गो० अ० प्रे० प्रे० एकोद्दिष्टश्राद्धेक्षणउप०॥
अ० गो० अ० प्रे० प्रे० एकोद्दि० पाद्यमु० ॥ अ० गो० अ० प्रे० प्रे० एको० आसनंउप० ॥ त
त्रदक्षिणांकुशांश्चपात्रमध्येगंधपुष्पंचभृंगिराजंचक्षिप्त्वा ॥ तूष्णींतिलान्क्षिप्त्वा ॥ अ० गो० अ०
प्रे० प्रे० एको० महैकोद्दिष्टेइदमर्घ्यंतवोपतिष्ठतामिति ॥ अर्घ्यंदत्वा ॥ अ० गो० अ० प्रे० प्रे०
मृ० एको० एकोद्दिष्टश्राद्धेगंधपुष्पभृंगिराजतुलसीपत्रगोपीचंदनयज्ञोपवीततांबूलंओदनानिदद्यात्
पात्रेघृताक्तंसितधान्यमादाय ॥ विप्रपाणिप्रक्षाल्य ॥ तत्रदर्भानास्तीर्य ॥ अ० गो० अ० प्रेतायस्वाहेति

हस्तयोः एकामाहुतिंहुत्वा ॥ तदन्नमग्नौक्षिपेत् ॥ नवापाणिहोमः ॥ अग्नावेकोद्दिष्टेतु ॥ अ० गो०
अमुकप्रेतायस्वाहाइत्यग्नावाहुतिहोमः ॥ परिवेषणादिअंगुष्ठनिवेशनांतंकृत्वा ॥ अ० गो० अ०
प्रेतायेदमन्नंयथाशक्तिसोपस्करममृतरूपमुपतिष्ठतामितिसंकल्प्य ॥ आपोशनादिदत्वा ॥ अग्नावेकोद्दि
ष्टेतु ॥ उदीरतामित्यष्टाभिर्मंत्रैः ॥ प्रणवादिस्वाहाकारांतैश्चतुर्वारावृत्याद्वात्रिंशदाहुतीर्ग्रासमितः ॥ सो
पस्करस्यान्नस्यजुहुयात् ॥ इदंनममेतिवर्जयेत् ॥ उदीरतेत्यष्टर्चःशंखःपितरस्त्रिष्टुप् ॥ महैकोद्दिष्टान्न
होमेविनियोगः ॥ उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः ॥ असुंयईयुरवृकाऋतज्ञास्तेनोवंतु
पितरोहवेषुस्वाहा ॥ १ ॥ इदंपितृभ्योनमोअस्त्वद्ययेपूर्वासोयउपरासईयुः ॥ येपार्थिवेरजस्यानिषत्तावे
वानूनंसुवृजनासुविक्षुस्वाहा ॥ २ ॥ आहंपितॄन्सुविदत्रांअवित्सिनपातंचविक्रमणंचविष्णोः ॥
बर्हिषदोयेस्वधयासुतस्यभजंतपित्वस्तइहागमिष्ठाःस्वाहा ॥ ३ ॥ बर्हिषदःपितरऊत्यर्वागिमावोह
व्याचकृमाजुषध्वं ॥ तआगतावसाशंतमेनाथानःशंयोररपोदधातनस्वाहा ॥ ४ ॥ उपहूताःपितरःसो
म्यासोबर्हिष्येषुनिधिषुप्रियेषु ॥ तआगमंतुतइहश्रुवंत्वधिब्रुवंतुतेवंत्वस्मान्स्वाहा ॥ ५ ॥ आच्याजा

नुदक्षिणतोनिषद्येमंयज्ञमभिगृणीतविश्वे ॥ माहिंसिष्टपितरःकेनचिन्नोयद्वआगःपुरुषताकरामस्वाहा ॥ ६ ॥ आसीनासोअरुणीनामुपस्थेरयिंधत्तदाशुषेमर्त्याय ॥ पुत्रेभ्यःपितरस्तस्यवस्वःप्रयच्छततइहो र्जंदधातस्वाहा ॥ ७ ॥ येनःपूर्वेपितरःसोम्यासोनूहिरेसोमपीथंवसिष्ठाः ॥ तेभिर्यमःसंरराणोहवींष्युशन्नु शद्भिःप्रतिकाममत्तुस्वाहा ॥ ८ ॥ एवं द्वात्रिंशद्दाहुतीर्हुत्वा ॥ पिंडार्थमेकंकुशंनिधाय ॥ अभ्युक्ष्य ॥ अ० गो० अ० प्रे० प्रेतत्वनिवृत्यर्थंपिंडार्थेदर्भासनंउ० तस्योपरितिलोदकंउप० ॥ अ० गो० अ० प्रे० प्रेतत्वनिवृत्यर्थंचरुपिंडउप० ॥ तस्योपरितिलोदकमु० ॥ प्रेतपिंडायअंजनाभ्यंजनमुप० ॥ प्रेत० पाद्यंउ० प्रेत० अर्घ्यंउ० ॥ प्रेत० आचमनीयंउ० ॥ प्रेत० स्नानंउ० ॥ प्रेत० वस्त्रमु० ॥ प्रेतपिंडायगंधमाल्यभृंगिराजतुलसीत्राण्युपति० ॥ सर्वोपचारार्थेतिलाःउप० ॥ प्रेत० धूपदीपच रुनैवेद्यउ० ॥ प्रेत० तांबूलदक्षिणाउप० ॥ प्रेतस्यवस्त्रशयनासनाभरणानिपादुकाछत्रोदकपात्रवाह नादीनियथाशक्तिदद्यात् ॥ भूयसींचदक्षिणांदद्यात् ॥ संतोषयेत् ॥ अतसीपु० ॥ अनादिनिधनोदे० ॥ अभिरम्यतामितिविसर्जयेत् ॥ अभिरतोस्मीतिप्रतिवचनं ॥ ॥ इत्येकोद्दिष्टेएकोविप्रः ॥ दिवैव निमंत्रणंएकमर्घ्यपात्रंधूपदीपौनस्तः ॥ सर्वंप्राचीनावीतिनैवकार्यं ॥ इतिएकोद्दिष्टविधिः ॥ ॥ अथरु

द्रगणश्राद्धं ॥ तत्रैकादशरुद्रनामानि ॥ वीरभद्रश्च १ शंभुश्च २ गिरिजश्च ३ महायशः ४ ॥ अजैकपा ५ दहिर्बुध्न्यः ६ ॥ पिनाकीचा ७ पराजितः ॥ ८ ॥ १ ॥ भुवनाधीश्वरश्चैव ९ कपालीच १० विशांपतिः ११ ॥ स्थाणुर्भगश्चभगवान्रुद्राएकादशःस्मृताः ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अ० गो० अ० प्रे० प्रेतत्वनिवृत्योत्तमलोकप्राप्त्यर्थंमृताह्वात्एकादशेन्हिरुद्रगणश्राद्धानिकरिष्ये ॥ चटंस्थापयेत् ॥ इहलोकंप० ॥ अ० गो० अ० प्रे० वीरभद्रस्वरूपीक्षणउप० ॥ अ० गो० अ० प्रे० शंभुस्वरूपीक्षणउप० ॥ अ० गो० अ० प्रे० गिरिजास्वरूपीक्षणउप० ॥ अ० प्रे० महायशःस्वरूपीक्षणउप० ॥ अ० गो० अ० प्रे० अजैकपादस्वरूपीक्षणउपाति० ॥ अ० गो० अ० प्रे० अहिर्बुध्न्यस्वरूपीक्षणउप० ॥ अ० गो० अ० प्रे० पिनाकिस्वरूपीक्षणउ० ॥ अ० गो० अ० प्रे० अपराजितस्वरूपीक्षणउप० ॥ अ० गो० अ० प्रे० भुवनाधीश्वरस्वरूपीक्षणउ० ॥ अ० गो० अ० प्रे० कपालीस्वरूपीक्षणउप० ॥ अ० गो० अ० प्रे० विशांपतिस्वरूपीक्षणउप० ॥ अ० गो० अ० प्रे० रुद्रगणश्राद्धेआसनमुप० ॥ अ० गो० अ० प्रे० रुद्र० पाद्यमुप० ॥ अ० गो० अ० प्रे० रुद्र० अर्घ्यमुप० ॥ अमु० गो० अ० प्रे० ॥ रुद्र० गंधमाल्यभृंगिराजतुलसीपत्राण्युप० ॥ सर्वोपचारार्थेतिलाःउप० ॥ अ० गो० अ० प्रे० रुद्र० आमान्नंउ

प० ॥ अ० गो० अ० प्रे० रुद्र० दक्षिणाउप० ॥ अनेनरुद्रगणश्राद्धेनप्रेतस्वरूपीउप० ॥ अन्ने
नामान्नेनवा ॥ भोजनानंतरंदक्षिणांविसर्जयेत् ॥ अत्रपिंडदानार्घ्याग्नौकरणविकिराणामभावः ॥ वाक्र
ताकृतं ॥ ॥ इतिरुद्रगणश्राद्धविधिः समाप्तः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
श्रीगणेशायनमः ॥ ॥ अथवसुगणश्राद्धविधिप्रारंभः ॥ सव्यं ॥ देशकालौस्मृत्वा ॥ प्राचीनावी
ती ॥ अ० गो० अ० प्रे० प्रे० प्रेतत्वनिवृत्योत्तमलोकप्राप्त्यर्थंवसुगणश्राद्धंकरिष्ये ॥ चटंस्थापये
त् ॥ इहलोकंप० ॥ अ० गो० अ० प्रे० ऋववसुरूपीक्षणउप० ॥ अ० गो० अ० प्रे० अध्वर
वसुरूपीक्षणउप० ॥ २ ॥ अ० गो० अ० प्रे० सोमवसुरूपीक्षणउप० ॥ ३ ॥ अ० गो० अ०
प्रे० आपवसुरूपीक्षणउप० ॥ ४ ॥ अ० गो० अ० प्रे० अनिलवसुरूपीक्षणउप० ॥ ५ ॥ अ०
गो० अ० प्रे० अनलवसुरूपीक्षणउप० ॥ ६ ॥ अ० गो० अ० प्रेत० प्रत्यूषवसुरूपीक्षणउप० ॥
॥ ७ ॥ अ० गो० अ० प्रे० प्रभाववसुरूपीक्षणउपतिष्ठतु ॥ ८ अमु० गो० अ० प्रे० वसुगण
श्राद्धेपाद्यमुप० ॥ अ० गो० अ० प्रे० वसुग० आसनमुप० ॥ अ० गो० अ० प्रे० वसुग०
अर्घ्यमुप० ॥ अ० ॥ गो० अ० प्रे० वसु० गंधमाल्यभृंगिराजतुलसीपत्राणिसर्वोपचारार्थेतिलाः
उप० ॥ अ० गो० अ० प्रे० वसु० फलमुप० ॥ आच्छादनमुप० ॥ अ० गो० अ० प्रे० वसु० आ

मान्नमुप० ॥ अ० गो० अ० प्रे० दक्षिणाउप० ॥ अनेनवसुगणश्राद्धेनप्रेतस्वरूपीउप० ॥ अन्ने नआमान्नेनवा ॥ भोजनानंतरंदक्षिणांविसर्जयेत् ॥ अत्रपिंडदानार्घ्याग्नौकरणविकिराणामभावः ॥ कृताकृतं ॥ ॥ इति वसुगण श्राद्धानि समाप्तानि ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

श्रीगणेशायनमः॥ ॥ अथषोडशश्राद्धप्रारंभः ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अमुकगोत्रस्य अमुकप्रेतस्यप्रेतत्वनिवृत्योत्तमलोकप्राप्त्यर्थंआद्यमासिकऊनमासिकद्वितीयमासिकत्रैपक्षिकमासिकतृतीयमासिकचतुर्थमासिकपंचममासिकषष्ठमासिकऊनषण्मासिकसप्तममासिकअष्टममासिकनवममासिकदशममासिकएकादशमासिकद्वादशमासिकऊनाब्दिकमासिकानिएतानिषोडशमासिकश्राद्धानि स्वस्वकालेकर्तव्यानिइहदशाहेसपिंडीकरणाधिकारसिध्यर्थंअपकृष्यैकादशेद्वादशेन्हिवाअन्नेनामान्नेन वाएकोद्दिष्टादिविधिनातंत्रेणकरिष्ये ॥ घटंस्थापयेत् ॥ इहलोकंप० ॥ अ० गो० अ० प्रे० आद्यमासिकश्राद्धेक्षणउ० ॥ १ ॥ अ० गो० अ० प्रे० उनमासिकश्राद्धेक्षण० ॥ २ ॥ अ० गो० अ० प्रे० द्वितीयमासिकश्राद्धेक्षण० ॥ ३ ॥ अ० गो० अ० प्रे० त्रैपक्षिकमासिकश्राद्धेक्षण० ॥ ४ ॥ अ० गो० अ० प्रे० तृतीयमासिकश्राद्धेक्षण० ॥ ५ ॥ अ० गो० अ० प्रे० चतुर्थमासिकश्राद्धेक्षण० ॥ ६ ॥ अ० गो० अ० प्रे० पंचममासिकश्राद्धेक्षण० ॥ ७ ॥ अ० गो० अ० प्रे० षष्ठमासिक

श्राद्धेक्षण० ॥ ८ ॥ अ० गो० अ० प्रे० ऊनषण्मासिकश्राद्धेक्षण० ॥ ९ ॥ अ० गो० अ० प्रे०
सप्तममासिकश्राद्धेक्षण० ॥ १० ॥ अ० गो० अ० प्रे० अष्टममासिकश्रात्धेक्षणउ० ॥ ११ ॥ अ०
गो० अ० प्रे० नवममासिकश्राद्धेक्षण० ॥ १२ ॥ अ० गो० अ० प्रे० दशममासिकश्राद्धेक्षण०
॥ १३ ॥ अ० गो० अ० प्रे० एकादशमासिकश्राद्धेक्षण० ॥ १४ ॥ अ० गो० अ० प्रे० द्वा
दशमासिकश्राद्धेक्षण० ॥ १५ ॥ अ० गो० अ० प्रे० ऊनाब्दिकमासिकश्राद्धेक्षण० ॥ १६ ॥
अ० गो० अ० प्रे० आद्यमासिकऊनाब्दिकांतानांमासिकश्राद्धेषुपाद्यमुप० ॥ अ० गो० अ प्रे०
मासिकश्राद्धेषुआसनमुपति० ॥ अ० गो० अ० प्रे० मासि० अर्घ्यमु० ॥ अ० गो० अ० प्रे०
मासि० ॥ गंधमाल्यभूं० तु० धूपदीपगोपीचंदनयज्ञोपवीततांबूलआच्छादनानिप्रत्येकंशोडशेभ्योद
द्यात्उपतिष्ठंतु ॥ अर्घ्यमग्नौकरणंएकोद्दिष्टवत् ॥ अंगुष्ठनिवेशनांतंपूर्ववत् ॥ ततःविप्रसमीपेदर्भशि
खायांअयंपिंडउपतिष्ठतामितिषोडशपिंडान्दद्यात् ॥ आमपक्षेआमान्नस्यसंकल्पः ॥ सक्तुपिष्टेनच
पिंडदानं ॥ अ० गो० अ० प्रे० प्रेतत्वनिवृत्योत्तमलोकप्राप्त्यर्थमासिकश्राद्धेषुपिंडार्थेदर्भासनमु
पति० ॥ तस्योपरितिलोदकंउप० ॥ अ० गो० अ० प्रे० आद्यमासिकश्राद्धेसक्तुपिंडउ० ॥ अ०
गो० अ० प्रे० ऊनमासिकश्राद्धेसक्तुपिंडउप० ॥ अ० गो० अ० प्रे० द्वितीयमासिकश्राद्धेसक्तु

पिंडउप० ॥ अ० गो० अ० प्रे० त्रैपक्षिकमासिकश्राद्धेसक्तुपिंडउप० ॥ अ० गो० अ० प्रे० तृतीय
मासिकश्राद्धेसक्तुपिंडउप० ॥ अ० गो० अ० प्रे० चतुर्थमासिकश्राद्धेसक्तुपिंडउप० ॥ अ०
गो० अ० प्रे० पंचममासिकश्राद्धेसक्तुपिंडउप० ॥ अ० गो० अ० प्रे० षष्ठमासिकश्राद्धेसक्तु
पिंडउ० ॥ अ० गो० अ० प्रे० ऊनषण्मासिकश्राद्धेसक्तुपिंडउ० ॥ अ० गो० अ० प्रे० सप्तममासि
कश्राद्धेसक्तुपिंडउ० ॥ अ० गो० अ० प्रे० अष्टममासिकश्राद्धेसक्तुपिंडउ० ॥ अ० गो० अ० प्रे०
नवममासिकश्राद्धेसक्तुपिंडउ० ॥ अ०गो० अ०प्रे०दशममा०स०अ०गो०अ० प्रे० एकादशमा
सिकश्राद्धेसक्तुपिंडउप० ॥ अ० गो० अ० प्रे० द्वादशमासिकश्राद्धेसक्तुपिंडउ० अ० गो० अ०
प्रे० ऊनाब्दिकमासिकश्राद्धेसक्तुपिंडउ० ॥ तस्योपरितिलोदकमुप० ॥ प्रेतपिंडेभ्यःअंजनाभ्यंजनमु० ॥
प्रेत० पाद्यमु० प्रेत अर्घ्यमुप० प्रेत० आचमनीयमु० प्रेत० स्नान० प्रेत० वस्त्रयज्ञोपवीतगंध
माल्यभृंगिराजतुलसीपत्राण्यु० प्रेत० धूपदीपनैवद्यतांबूलदक्षिणाउप० ॥ प्रेतपिंडेभ्यःउत्तरीवासो
दकमु० ॥ प्रेतपिंडोपरिदर्भैस्छापयेत् ॥ अतसीपु० ॥ अनादिनि० ॥ अभिरम्यतामितिविसर्जयेत् ॥ य
दिमरणादारभ्यद्वादशमासमध्येकश्चिद्दिमस्तदातन्मासिकंद्विवारंकार्यं ॥ एवंसप्तदशश्राद्धानिभवंति
॥ ५ ॥ इतिएकादशदिनविधिःसमाप्तः ॥ छ ॥ छ ॥ छ ॥

श्रीगणेशायनमः ॥ अथद्वादशदिनविधिप्रारंभः ॥ अथसपिंडीकरणं ॥ आचम्यप्राणानायम्य ॥ देशकालौ स्मृत्वा ॥ प्राचीनावीती ॥ अमुकगोत्रस्यअमुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंपितृलोकप्राप्त्यर्थंअमुकगोत्रे अमुकशर्मभिःवसुरुद्रादित्यस्वरूपैस्ततत्पितृपितामहप्रपितामहैःसपिंडीकरणंमृताहात्द्वादशाहेपार्वणै कोद्दिष्टविधानेनकरिष्ये ॥ इतिसंकल्प्य ॥ ततःकामकालसंज्ञकविश्वेदेवस्थानेक्षणंदत्वाभवद्भिः प्रसादःकर्तव्यः ॥ प्रेतस्थानेक्षणउपतिष्ठतु ॥ प्रेतस्यपितृपितामहप्रपितामहस्थानेक्षणंदत्वाभवद्भिःप्रसादःकर्तव्यः ॥ एवंक्षणंपाद्यासनादिसर्वंपार्वणैकोद्दिष्टंकार्यं ॥ अर्घ्यार्थमेकपात्रमासाद्यतत्पूर्वतःपात्रत्रयमासाद्य ॥ प्रेतपात्रेचतुःकुशंकूर्चंनिधायपात्रांतरेत्रिकुशंनिधायापःसिच्यप्रेतपात्रेमहैकोद्दिष्टवत्तूष्णींतिलान्क्षिप्त्वा ॥ पितामहादिपात्रेयथापठितेनमंत्रेणतिलान्क्षिप्त्वा ॥ गंधपुष्पादिक्षिप्त्वा ॥ शंनोदेवीतिमंत्रेणपितृपात्राणिसंपन्नानि ॥ इतिपार्वणवत्ततःप्रेतपात्रस्थमेकंपवित्रंस्थानीब्राह्मणहस्तेदत्वातत्पात्रस्थमुदकंकिंचिद्गृहीत्वा ॥ अमुकगोत्रअमुकप्रेतइदंतेअर्घ्यमुपतिष्ठतामितिअर्घ्यंदत्वा ॥ अमुकगोत्रअमुकप्रेतपात्रोदकं अमुकगोत्राणांअमुकशर्मणांप्रेतापितृपितामहप्रपितामहानांअर्घ्यपात्रोदकेनसंयोजयिष्ये ॥ इतिपृष्टे ॥ संयोजयस्वेतिब्राह्मणस्यप्रतिवचनं ॥ प्रेतपात्रस्थकुशत्रयंपितृपात्रत्रयेदत्वा ॥ प्रेतार्घ्यपत्रजलंवक्ष्यमाणमंत्रैः ॥ किंचित्किंचित्संयोजयेत् ॥ मंत्रास्तु ॥ येसमानाःसमनसःपितरोयमराज्ये ॥ तेषांलोकःस्वधान

मोयज्ञोयज्ञेषुकल्पतां ॥ १ ॥ येसजाताःसमनसोजीवाजीवेषुमामकाः ॥ तेषां श्रीर्मयिकल्पतामस्मिँल्लोकेशतंसमाः ॥ २ ॥ संगच्छध्वंसंवदध्वंसंवोमनांसिजानतां ॥ देवाभागंयथापूर्वेसंजानानाउपासते ॥ ३ ॥ समानोमंत्रःसमितिःसमानीसमानंमनःसहचित्तमेषां ॥ समानंमंत्रमभिमंत्रयेवःसमानेनवोहविषाजुहोमि ॥ ४ ॥ समानीवआकूतिःसमानाहृदयानिवः ॥ समानमस्तुवोमनोयथावःसुसहासति ॥ ५ ॥ अमुकशर्मन्प्रेतामुकगोत्रअमुकशर्माभिः पितृपितामहप्रपितामहैःसहसायुज्यंगच्छेत्युत्कानंतरंपित्रादिपात्रोदकेनपार्वणवत्तेभ्योर्घ्यंदत्वा ॥ गंधाच्छादनादियथाक्रमंसर्वेभ्योदद्यात् ॥ प्रेतस्थानेअग्नौकरणंएकोद्दिष्टवत् ॥ पार्वणवत्पितृस्थानेततोन्नंपरिषिच्यदेवपात्रेपृथ्वीतेपात्रमित्यादिअमुकगोत्रायामुकशर्मणेप्रेतायेदमन्नमुपतिष्ठतामिति ॥ प्रेतस्थानेसंकल्पः ॥ पित्रादिस्थानत्रयेपार्वणवत् ॥ भोजनांतेउच्छिष्टपिंडोदेयः ॥ तदनंतरंउच्छिष्टसमीपंप्रोक्ष्योल्लिख्य ॥ अपहतात्यभ्युक्ष्य ॥ दर्भैरवस्तीर्य ॥ अमुकगोत्रअमुकप्रेतअयंपिंडउपतिष्ठतामिति ॥ एकंपिंडंप्रेतोद्देशेनदद्यात् ॥ अस्यदक्षिणतः ॥ पंक्तिरूपेणपार्वणवत्पित्रादिभ्यः पिंडत्रयंदद्यात् ॥ ततः ॥ प्रेतस्थानेतूष्णींजलंदत्वा ॥ अमुकप्रेतस्ययद्दत्तंश्राद्धंतदक्षय्योदकंउप० ॥ विशिष्टदक्षिणांदत्वाअभिरम्यतामितिविसर्जयेत् ॥ ततःअमुकगोत्रस्यामुकप्रेतस्यपिंडान्पित्रादिपिंडैःसहसंयोजयिष्ये॥ इतिपृष्ट्वा ॥ संयोजयस्वेतिद्विजैःप्रत्युक्तःक

तांमधुवाताइतितृचेनकुशेनप्रेतपिंडंत्रिधाविभज्य ॥ अवयवत्रयंत्रिषुपिंडेषुयोजयेदेभिर्मंत्रैःपूर्वोक्तैः ॥ येस
मानाःसमनसःपितरोयमराज्ये ॥ तेषांलोकःस्वधानमोयज्ञोयज्ञेषुकल्पतां ॥ येसजाताःसमनसोजीवा
जीवेषुमामकाः ॥ तेषांश्रीर्मयिकल्पतामस्मिन्लोकेशतंसमाः ॥ ॥ संगच्छध्वंसंवदध्वंसंवोम
नांसिजानतां ॥ देवाभागंयथापूर्वेसंजानानाउपासते ॥ समानोमंत्रःसमितिःसमानीसमानंमनःसहचि
त्तमेषां ॥ समानोमंत्रमभिमंत्रयेवःसमानेनवोहविषाजुहोमि ॥ समानीवआकूतिःसमानाहृदयानिवः ॥
समानमस्तुवोमनोयथावःसुसहासति ॥ मधुवाताऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नःसंत्वोषधीः ॥
मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः ॥ मधुद्यौरस्तुनःपिता ॥ मधुमान्नोवनस्पतिर्मधुमांअस्तुसूर्यः ॥
माध्वीर्गावोभवंतुनः ॥ अमुकगोत्रअमुकप्रेतअमुकशर्मणास्त्वपित्रासंसृज्यस्वेतिवदन् ॥ प्रेतपिंडप्र
थमभागंतत्पिंडेसंयोज्यदधिमधुभ्यांमिश्रीकुर्यात् ॥ मधुवाताइत्येताभिःतिसृभिःऋग्भिः॥ एवंप्रेतस्यपिता
महप्रपितामहानांप्रतिपिंडेनसंयोजनं ॥ येसमानाइत्यादीनांसर्वमंत्राणामावृत्तिः ॥ प्रेतपिंडावयव
त्रयेणसंयोजितांस्त्रीन्पिंडान्दानांतमारभ्यपुरुषत्रयपार्वणवत्पुनरपिनामगोत्राद्युच्चार्यदद्यादित्याहुः ॥
द्वादशादिनपर्यंतंधारितमुत्तरीयंपिंडोपरिदद्यात्तच्चाचार्योगृह्णीयात् ॥ अवयवपिंडान्पाकस्थालींच

आचार्यायदद्यात् ॥ ततः॥ एषवोनुगतःप्रेतःपितृभागमवाप्तवान् ॥ शुभंभवतुतेषांचजायतांचिरजीविनः॥
तिमंत्रंपठेत् ॥ ततोविकिरंदद्यात् ॥ शिवाआपःसंत्वित्यादिपार्वणवत् ॥ प्रेतस्थानेअन्यविप्राहिगुणंद
क्षिणांदद्यात् ॥ वाजेवाजेत्यादिअभिरम्यतामितिविसर्जयेत् ॥ आसीमांतंअनुव्रज्यपिंडान्गंगादौप्र
क्षिप्य ॥ स्नात्वागृहमागत्यवैश्वदेवादिकंकृत्वा ॥ इतिसपिंडीकरणं समाप्तं ॥ ७ ॥ ॥
श्रीगणेशायनमः ॥ ॥ अथपाथेयश्राद्धप्रारंभः ॥ ॥ अथद्वादशेत्रयोदशेवाह्निप्रातःस्नात्वा ॥ आ
चम्यप्राणानायम्यतिथ्यादिस्मृत्वा ॥ प्राचीनावीती ॥ अमुकगोत्रस्यामुकशर्मणःप्रेतस्यपितृलोकगम
नेसुखसिध्यर्थं ॥ अमुकगोत्राणांअमुकशर्मणांअस्मत्पितापितामहप्रपितामहानांवसुरुद्रादित्यस्वरू
पाणांपाथेयश्राद्धंसदैवंसपिंडंकरिष्ये ॥ इतिसंकल्प्य ॥ क्षणपाद्यासनादिसर्वंपार्वणवत् ॥ पक्वान्नेन
वाकुर्यात् ॥ इतिपाथेयश्राद्धं ॥ ॥ इति द्वादशादिनविधिः समाप्तः ॥ ॥ ७ ॥ श्रीगणेशायन
मः ॥ ॥ अथत्रयोदशादिनविधिप्रारंभः ॥ ततःकर्ताअभ्यंगस्नानंकृत्वा ॥ देशकालौस्मृत्वा ॥ म
मगृहेवाममकुले ॥ अस्माकंसहकुटुंबानांसहपरिवारस्यमेसकलारिष्टोपशांतयेक्षेमायुसिध्यर्थंश्री
परमेश्वरप्रीत्यर्थंनिधनशांतिंकरिष्ये ॥ तदंगत्वेनगणेशपूजनंस्वस्तिवाचनंकरिष्ये ॥ इतिसंकल्प्य ॥
यथाशाखांस्वस्त्ययनंवाचयित्वा ॥ शांतिसूक्तानिनिधनसूक्तानिजपेयुः ॥ आनोभद्रा० ॥ वर्ग ॥ १ ॥

स्वस्तिनो० वर्ग ॥ २ ॥ शन्नइंद्राग्नी० ॥ वर्ग ॥ ३ ॥ शंवतीःपा० वर्ग ॥ १ ॥ आशुःशिशानो०
वर्ग ॥ ३ ॥ मुंचामित्वा वर्ग ॥ १ ॥ त्यमूषुवाजि० वर्ग ॥ १ ॥ महित्रीणाम० वर्ग ॥ १ ॥ ईळे
द्यावापृथिवीपूर्वचित्तयेग्निंघर्मंसुरुचंयामंनिष्टये ॥ याभिर्भरेकारमंशायजिन्वथस्ताभिरूषुऊतिभिरश्वि
नागतं ॥ युवोर्दानायसुभराअसश्चतोरथमातस्थुर्वचसंनमंतवे ॥ याभिर्धियोवथःकर्मन्निष्टयेताभिरूषुऊ
तिभिरश्विनागतं ॥ युवंतासांदिव्यस्यप्रशासनेविशांक्षयथोअमृतस्यमज्मनां ॥ याभिर्धेनुमस्वां पिन्व
थोनराताभिरूषुऊतिभिरश्विनागतं ॥ याभिःपरिज्मातनयस्यमज्मनाद्विमातातूर्षुतरणिर्विभूषति ॥ या
भिस्त्रिमंतुरभवद्विचक्षणस्ताभिरूषुऊतिभिरश्विनागतं ॥ याभीरेभंनिवृतंसितमद्भ्यउद्वंदनमैरयतंस्वर्दृ
शे ॥ याभिःकण्वंप्रसिषासंतमावतंताभिरूषुऊतिभिरश्विनागतं ॥ १ ॥ ऋ० ॥ ५ ॥ याभिरंतकंज
समानमारणेभुज्युंयाभिरव्यथिभिर्जिजिन्वथुः ॥ याभिःकर्कंधुंवय्यंचजिन्वथस्ताभिरूषुऊतिभिरश्विनाग
तं ॥ याभिःशुचंतिंधनसांसुषंसदंतप्तंघर्ममोम्यावंतमत्रये ॥ याभिःपृश्निगुंपुरुकुत्समावतंताभिरूषुऊति
भिरश्विनागतं ॥ याभिःशचीभिर्वृषणापरावृजंप्रांधंश्रोणंचक्षसएतवेकृथः ॥ याभिर्वर्तिकांग्रसितामुमुं

वतंताभिरूषुऊतिभिरश्विनागतं ॥ याभिःसिंधुंमधुमंतमसश्चतंवासिष्ठंयाभिरजरावजिन्वतं ॥ याभिःकु
त्संश्रुतर्यंनर्यमावतंताभिरूषुऊतिभिरश्विनागतं ॥ याभिर्विश्पलांधनसामथर्व्यंसहस्रमीळ्हआजावजि
न्वतं ॥ याभिर्वशमश्व्यंप्रेणिमावतंताभिरूषुऊतिभिरश्विनागतं ॥ २ ॥ ऋ० ॥ ५ ॥ याभिःसुदानू
औशिजायवणिजेदीर्घश्रवसेमधुकोशोअक्षरत ॥ कक्षीवंतंस्तोतारंयाभिरावतंताभिरूषुऊतिभिरश्विना
गतं ॥ याभीरसांक्षोदसोद्नः पिपिन्वथुरनश्वंयाभीरथमावतंजिषे ॥ याभिस्त्रिशोकउस्रियाउदाजतस्ता
भिरूषुऊतिभिरश्विनागतं ॥ याभिःसूर्यंपरियाथःपरावतिमंधातारंक्षेत्रपत्येष्वावतं ॥ याभिर्विप्रंप्रभरद्वा
जमावतंताभिरूषुऊतिभिरश्विनागतं ॥ याभिर्महामतिथिग्वंकशोजुवंदिवोदासंशंबरहत्यआवतं ॥ या
भिःपूर्भिद्येत्रसदस्युमावतंताभिरूषुऊतिभिरश्विनागतं ॥ याभिर्वम्रंविपिपानमुपस्तुतंकलिंयाभिर्वित्तजा
निंदुवस्यथः ॥ याभिर्व्यश्वमुतपृथिमावतंताभिरूषुऊतिभिरश्विनागतं ॥ ॥ ३ ॥ ऋ२ ॥ याभिर्नरा
शयवेयाभिरत्रयेयाभिःपुरामनवेगातुमीषथुः ॥ याभिःशारीराजतंस्यूमरश्मयेताभिरूषुऊतिभिरश्विनाग
तं ॥ याभिःपठर्वाजठरस्यमज्मनाग्निर्नादीदेच्चितइद्धोअज्मन्ना ॥ याभिःशर्यातमवथोमहाधनेताभिरूषु

ऊतिभिरश्विनागतं ॥ याभिरंगिरोमनसानिरण्यथोग्रंगच्छथोविवरेगोअर्णसः ॥ याभिर्मनुंशूरमिषासमा
वतंताभिरूषुऊतिभिरश्विनागतं ॥ याभिःपत्नीर्विमदायन्यूहथुराघवायाभिररूणीरशिक्षतं ॥ याभीसुदा
संऊहथुःसुदेव्यं, ताभिरूषुऊतिभिरश्विनागतं ॥ याभिःशंतातीभवथोददाशुषेभुज्युंयाभिरवथोय.भि
रध्रिगुं ॥ ओम्यावतींसुभरामृतस्तुभंताभिरूषुऊतिभिरश्विनागतं ॥ ४ ऋ५ ॥ याभिःकृशानुमसनेदु
वस्यथोजवेयाभिर्यूनोअर्वंतमावतं ॥ मधुप्रियंभरथोयत्सरड्भ्यःस्ताभिरूषुऊतिभिरश्विनागतं ॥ याभिर्न
रंगोषुयुधंनृषाह्येक्षेत्रस्यसातातनयस्याजिन्वथः ॥ याभीरथांअवथोयाभिरर्वतस्ताभिरूषुऊतिभिरश्विना
गतं ॥ याभिःकुत्समार्जुनेयंशतक्रतूप्रतुर्वीतिंप्रचदभीतिमावतं ॥ याभिर्ध्वसंतिंपुरुषंतिमावतंताभिरू
षुऊतिभिरश्विनागतं ॥ अप्रस्वतीमश्विनावाचमस्मेकृतन्नोदस्त्रावृषणामनीषां ॥ अद्यूत्येवसेनिर्ह्वयेवां
वृधेचनोभवतंवाजसातौ ॥ द्युभिरक्तुभिःपरिपातमस्मानरिष्टेभिरश्विनासौभगेभिः ॥ तन्नोमित्रोवरुणो
मामहंतामदितिःसिंधुःपृथिवीउतद्यौः ॥ ५ ॥ निर्वर्तध्वंमानुगातास्मान्त्सिसक्तरेवतीः ॥ अग्नीषोमा

पुनर्वसूअस्मेधारयतंरयिं ॥ पुनरेनानिवर्तयपुनरेनान्याकुरु ॥ इंद्रएनानियंच्छत्वग्निरेनाउपाजतु ॥ पु
नरेतानिवर्ततामस्मिन्पुष्यंतुगोपतौ ॥ इहैवाग्नेनिधारयेहतिष्ठतुयारयिः ॥ यंनियानंन्ययनंसंज्ञानंय
त्परायणं ॥ आवर्तनंनिवर्तनंयोगोपाअपितंहुवे ॥ यउदानड्यघनंयउदानट्परायणं ॥ आवर्तनं
निवर्तनमपिगोपानिवर्ततां ॥ आनिवर्तनिवर्ततपुनर्नइंद्रगादेहि ॥ जीवाभिर्भुनजामहै ॥ परिवोविश्वतो
दधऊर्जाघृतेनपयसा ॥ येदेवाःकेचयज्ञियास्तेरय्यासंसृजंतुनः ॥ आनिवर्तनिवर्तयनिनिवर्तनिवर्तय ॥
भूम्याश्चतस्रःप्रदिशस्ताभ्यएनानिवर्तय ॥ ६ ॥ ऋ ८ ॥ भद्रन्नोअपिवातयमनः ॥ शांतांपृथिवीशिवम
तरिक्षंद्यौर्नोदेव्यभयंनोअस्तु ॥ शिवादिशःप्रदिशउद्दिशोनआपोविद्युतःपरिपांतुसर्वतःशांतिःशांतिःशांतिः
ममगृहेसर्वारिष्टशांतिरस्तु ॥ यजमानःतथास्तु ॥ यांतुदेवगणाःसर्वेपूजामादायपार्थिवीं ॥ इष्टकामत्र
सिध्यर्थंममकामफलप्रदां ॥ ब्राह्मणैःसहबंधुभिःस्वयंभुंजीत ॥ श्रीखंडतांबूलादिभक्षयित्वा ॥ भूय
सींदक्षिणांदद्यात् ॥ आचार्यवस्त्रदक्षिणांदद्यात्तोषयेत् ॥ इति निधन शांतिः समाप्ता ॥ ॥ छ ॥
श्रीगणेशायनमः ॥ ॥ अथउदकुंभश्राद्धं ॥ देशकालोस्मृत्वा ॥ प्रा० अस्मत्पितृपितामहप्रपिता
महानांअमुकगोत्राणांअमुकशर्मणांवसुरुद्रादित्यस्वरूपाणांउदकुंभश्राद्धंकरिष्ये ॥ इतिसंकल्प्य ॥

अदैवंपार्वणवत्कुर्यात् ॥ अब्दपर्यंतंप्रत्यहं ॥ अशक्तोप्रतिमासं ॥ संकटेएकदिनंकुर्यात् ॥ ॥ इति उदकुंभ श्राद्धं समाप्तं ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

श्रीगणेशायनमः ॥ ॥ अथमासिकश्राद्धानि ॥ ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अस्मत्पितृपितामहप्रपितामहानां अमुकगोत्राणांशर्मणांवसुरुद्रादित्यस्वरूपाणांऊनमासिकऊनाब्दिकांतानांएतानिपंचदशमासिकानिस्वकालेकर्तव्यानिअस्मत्कुलेचौलउपनयनविवाहनांदीश्राद्धनिमित्तअपकृष्यमाणःसद्यःसदैवानिसपिंडानिसाग्नौकरणानिपार्वणेनविधिनातंत्रेणकरिष्ये ॥ इतिसंकल्प्य ॥ अन्यत्सर्वंपार्वणवत् ॥ प्रतिमासंकार्यं ॥ अशक्तौअपकर्षः ॥ ॥ इतिमासिकश्राद्धं ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अस्मत्पितृपितामहप्रपितामहानांअमुकशर्मणांअमुकगोत्राणांवसुरुद्रादित्यस्वरूपाणांममपितुःअब्दपूरितश्राद्धंसदैवंसपिंडंसाग्नौकरणंपार्वणेनविधिनाअन्नेनहविषायुष्मदनुज्ञयासद्यःकरिष्ये ॥ इतिसंकल्प्य ॥ अन्यत्सर्वंपार्वणवत् ॥ इतिअब्दपूरितश्राद्धविधिः ॥ अथद्वितीयाह्निकश्राद्धविधिःआचम्यप्राणायामंकृत्वा ॥ देशकालौस्मृत्वा ॥ प्राचीनावीती ॥ अस्मत्पितृपितामहप्रपितामहानांअमु० शर्मणांअमुकगोत्राणांवसुरुद्रादित्यस्वरूपाणांममपितुःद्वितीयाह्निकश्राद्धंसदैवंसपिंडंसाग्नौकरणंपार्वणेनविधिनाअन्नेनहविषायुष्मदनुज्ञयासद्यःकरिष्ये ॥ इतिसंकल्प्य ॥ अन्यत्सर्वंपार्वणवत्कु

र्यात् ॥ तत्रदानानि ॥ तांबूलदानं ॥ छत्रदानं पादुकादानं ॥ उदकुंभदानं ॥ अन्नदानं ॥ ब्राह्मणाय दीपदानंचदद्यात् ॥ यथाशक्तिदक्षिणांदद्यात् ॥ मृतदिनमारभ्यअब्दपर्यंतएतत्कर्मसांगतासिध्यर्थं ब्राह्मणायसामान्यगोप्रदानंदत्वा ॥ भूयसींदक्षिणांदद्यात् ॥ अनेनकर्मणाश्रीपितरःस्वरूपीदेवताः प्रीयंतां ॥ इतित्रयोदशादिनविधिः ॥ अथपालाशविधिप्रारंभः ॥ ॥ आचम्यप्राणानायम्यदेशका लौसंकीर्त्य ॥ प्राचीनावीतीअमुकगोत्रस्यअमुकप्रेतस्यप्रेतत्वविमुक्तयोत्तमलोकप्राप्त्यर्थंमृताहात्विदे शस्थस्यमरणेप्रेतस्यमंत्राग्निरहितस्यअस्थिरहिताश्मरहितउत्तरीरहितनिमित्तऔर्ध्वदेहिकक्रियाधिकारा र्थंपालाशविधिंकरिष्ये ॥ इतिसंकल्प्य ॥ यवपिष्टेनशरीरनिर्माणं ॥ शिरसिचत्वारिंशत् ४० ग्रीवायां १० दश बाव्होःप्रत्येकंपंचाशत् १०० करांगुलिषुसर्वासुदश १० उदरेत्रिंशत् ॥ ३० ॥ जठरे विंशति २० शिश्नेचत्वारि ४ अंडयोस्त्रयस्त्रयः ६ ऊर्वोःप्रत्येकंपंचाशत् १०० जंघांतःपादतलांतंया वत्पादयोःप्रत्येकंपंचदश ३० सर्वासुपादांगुलिषुदश ॥ १० ॥ एवंषष्ट्यधिकशतत्रयमिति ३६० पा लाशपर्णैःशरीरंनिर्मायऊर्णासूत्रेणशरीरंबध्वाजललोडितयवपिष्टेनानुलिंपेत् ॥ ततःशक्तौसत्यांवक्ष्य माणान्यपिकार्याणिमूर्वस्थानेकदलीफलं ॥ १ ॥ शिरसिफलं ॥ २ ॥ वर्तुलंलंबंवाललाटेक दलीपत्रं ॥ ३ ॥ दंतेदाडिमबीजानि ॥ ४ ॥ कर्णेकंकणं ॥ ५ ॥ नेत्रयोःकपर्दकौ ॥ ६ ॥ नासि

कायांतिलपुष्पं ॥ ७ ॥ नाभौअभ्रकं ॥ ८ ॥ स्तनयोर्जंबीरफलद्वयं ॥ ९ ॥ वातेमनःशिलं ॥ १० ॥
पित्तेहरितालं ॥ ११ ॥ कफेसमुद्रफेनं ॥ १२ ॥ रुधिरेमधु ॥ १३ ॥ पुरीषेगोमयं ॥ १४ ॥ मूत्रेगोमूत्रं ॥ १५ ॥ रेतसिपारदं ॥ १६ ॥ वृषणयोर्वृंताकद्वयं ॥ १७ ॥ शिश्नेगृंजरं ॥ १८ ॥
केशेसूकरकेशाः ॥ १९ ॥ लोमावलीषुउर्णावस्त्रं ॥ २० ॥ मांसस्थानेयवपिष्टेनवामाषपिष्टेनवातंडुलपिष्टेनवालिंपेत् ॥ २१ ॥ ततःपंचगव्येनप्रोक्ष्य ॥ पंचामृतमंत्रेणपंचामृतेनप्रोक्ष्य ॥ पुनर्नोअसुमितिबृहदुक्थःप्राणास्त्रिष्टुप् ॥ प्राणप्रवेशनेविनियोगः ॥ पुनर्नोअसुंपृथिवीददातुपुनर्द्योर्देवीपुनरंतरिक्षं ॥ पुनर्नःसोमस्तन्वंददातुपुनःपूषापथ्यांयास्वितिऋक्इतिप्राणप्रवेशनंभावयेत् ॥ यद्वा ॥ यत्तेयममितिद्वादशर्चस्ययमोनुष्टुप् ॥ प्राणप्रवेशनेविनियोगः ॥ यत्तेयमंवैवस्वतंमनोजगामदूरकं ॥ तत्तआवर्तयामसीहक्षयायजीवसे ॥ १ ॥ यत्तेदिवंयत्पृथिवींमनो० ॥ तत्तआवर्त० ॥ २ ॥ यत्तभूमिंचतुर्भृष्टिंमनो० ॥
तत्तआवर्त० ॥ ३ ॥ यत्तेचतस्रःप्रदिशोमनो० ॥ तत्तआवर्त० ॥ ४ ॥ यत्तेसमुद्रमर्णवंमनो० ॥
तत्त० ॥ ५ ॥ तत्तेमरीचीःप्रवतोमनो० ॥ तत्तआवर्त० ॥ ६ ॥ यत्तेअपोयदोषधीर्मे० ॥ तत्तआवर्त० ॥ ७ ॥ यत्तेसूर्यंयदसंमनो० ॥ तत्तआ० ॥ ८ ॥ यत्तेपर्वतान्बृहतोम० तत्तआ ॥ ९ ॥ यत्ते

विश्वमिदंजगमनो० ॥ तन्नआ ॥ १० ॥ यत्तेपरापरावतोमनो० ॥ तन्न० ॥ ११ ॥ यत्तेभूतंच
भव्यंचमनो० ॥ तन्नआवर्त० ॥ १२ ॥ इतिद्वादशर्चेनसूक्तेनप्राणानानीय ॥ शुक्रमसिज्योतिरसितेजोसि ॥ इतिमंत्रेणपादेक्षिप्त्वा ॥ अक्षीभ्यांतइतिषुट्ऋचस्यसूक्तस्यशरीरंस्पृशेत् ॥ अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुकादधि ॥ यक्ष्मंशीर्षण्यंमस्तिष्कांजिव्हायाविवृहामिते ॥ ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्योऽअनूक्यात् ॥ यक्ष्मंदोषण्यंमंसाभ्यांबाहुभ्यांविवृहामिते ॥ आंत्रेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयादधि ॥ यक्ष्मंमतस्नाभ्यांयक्नःप्लाशिभ्योविवृहामिते ॥ ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां ॥ यक्ष्मंश्रोणिभ्याभासदाद्भंससोविवृहामिते ॥ मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः ॥ यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ॥ अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि ॥ यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ॥ ऋचा ॥ ॥६॥ इत्येतैःस्पृष्ट्वाशरीरंभावयित्वा ॥ स्नापयित्वा ॥ चंदनेनानुलिप्य ॥ वस्त्रेपरिधाप्य ॥ यज्ञोपवीतेपरिधाप्य ॥ शुभ्रसुगंधमाल्यादिभिरलंकृत्यायंसदेवदत्तइतिअभिमृश्य ॥ इदंचास्योपासनं ॥ इत्यग्निध्यात्वापूर्वोक्तवैतरिण्यादिदानपूर्वकं ॥ ऊर्णासूत्रेणवेष्टयित्वा ॥ कृष्णाजिनेनाच्छाद्यचितिस्थानमाधायपूर्वोक्तविधिनाशवदहेत् ॥ १ ॥ पालाशवृंताभावेकुशैःप्रकृतिंकुर्यात् ॥ आहिताग्नेःप्रकृतिदाहेअस्थिदाहेवादशाहमेवाशौचं ॥ अ

नाहिताग्नेस्तुसपिंडानांत्र्यहंपर्णशरदाहे ॥ पूर्वमगृहीताशौचयोर्भार्यापुत्रयोर्दशामहेव ॥ गृहीताशौचयोस्तुतयोरपित्रिरात्रमाशौचं ॥ पत्नीसंस्कारेपत्युश्चैवमेवसपत्न्योःपरस्परंचैवमेवाशौचं ॥ सापत्नमातुर्दशाहानंतरंत्र्यहंकार्यंसपत्नीपुत्रेण ॥ आहिताग्नौविदेशस्थेमृतेयावद्विधिनानसंस्कारः ॥ तावत्पुत्रादीनांनाशौचं ॥ २ ॥ अथपालाशप्रकृतिदाहविधिः ॥ तच्चदेशांतरमरणेपराकद्वयमष्टौकृच्छ्रावाकृत्वास्थीनिदहेत् ॥ यद्यस्थीनिचंडालादिभिःस्पृष्टानिस्युस्तदापंचगव्यगंगोदकाभ्यांप्रक्षाल्यविधिनादहेत् ॥ अथयास्यास्थीन्यपिनलभ्यंतेतस्यपर्णशरदाहः ॥ सचैवंवक्ष्यमाणकालेशुचिभूमौकृष्णमृगचर्मास्तीर्यतदुपरिएकंशरंदक्षिणोत्तरायतनिवेश्य ॥ तदुपरिपलाशत्रिवृंतानिन्यसेत् ॥ इतिपालाशविधिःसमाप्तः ॥ अथब्रह्मचारिमरणविधिप्रारंभः ॥ ब्रह्मचारिणोमृतिसंभावनायांतन्मरणोत्तरंवाअवकीर्णदोषनिमित्तंप्रायश्चित्तंकृत्वा ॥ प्रयोगरत्नसंगृहीतविधानमालोक्यकौपीनादिदानंब्रह्मचारिभ्योदत्वा ॥ व्रतविसर्जनंविधाय ॥ और्ध्वदेहिकाधिकारसिध्यर्थअर्कविवाहंकृत्वा ॥ और्ध्वदेहिकंकुर्यात् ॥ अथमंत्रसंक्षेपतः ॥ अत्रप्रयोगः ॥ ब्रह्मचारिणोमृतिसंभावनायांमरणोत्तरंतिथ्याद्युच्चार्यअमुकगोत्रस्यअमुकनाम्नोमृतस्यब्रह्मचारिणःम्रियमाणस्यब्रह्मचारिणोवाअवकीर्णदोषनिवृत्त्यर्थंद्वादशाब्दंषडब्दंत्र्यब्दान्यतमप्रायश्चित्तंप्रतिप्राजापत्यंअमुकगोनिष्क्रयप्रत्याम्नायद्वारायःकश्चिदन्यप्रत्याम्नायद्वारावासद्यःसूतकांतेवाअहमाचरिष्ये ॥ इति

अं. प्र. ॥ ३८ ॥

संकल्प्य ॥ पुनर्देशकालौनिर्दिश्य ॥ प्राचीनावीती ॥ अमुकगोत्रस्यअमुकनाम्नोब्रह्मचारिणोब्रह्मचर्या श्रमेणमरणजन्मदुर्गतिनिवृत्तिपूर्वकब्रह्मसायुज्यसिद्धयेममकुलस्याभिवृध्यर्थंसद्गतिसिध्यर्थंत्रिंशभ्योब्र ह्मचारिभ्यःप्रत्येकंकौपीनादिपदार्थान्दास्येइतिसंकल्प्य ॥ ब्रह्मचारिणंदत्वायुवंवस्त्राणीत्यादितत्पदार्थ लिंगकमंत्रानुच्चार्यकौपीनांगुलीयककर्णकुंडलकृष्णाजिनपादुकाछत्रमाल्यगोपीचंदनमणिप्रवालमा लायज्ञोपवीतंचेतिपदार्थानाममुकगोत्रायामुकनाम्नेब्रह्मचारिणेतुभ्यमहंसंप्रददेइतिदद्यात्॥संकल्प्यवा॥ एवंत्रिंशभ्योब्रह्मचारिभ्यःतदसंभवेसाधुगृहस्थेभ्योवादत्वा ॥ पुनःतिथ्याद्युच्चार्यअमुकनाम्नःब्रह्मचारि णोव्रतविसर्गंकरिष्ये ॥ तदंगत्वेनमातृपूजाहिरण्यविधिनाअभ्युदयिकंचकृत्वा ॥ व्रतावसर्गेकर्मणिस्थं डिलादिकरिष्ये ॥ इतिसंकल्प्य ॥ उल्लेखनाद्यग्न्याधानांतेसमिद्द्वयमादायआघारांतेअग्निंवायुंसूर्यंप्रजा पतिंअग्निंव्रतपतिंअग्निंव्रतानुष्ठानफलसंपादनंविश्वान्देवान्एताःसप्तदेवताप्रत्येकमेकैकयाज्याहुत्याय क्ष्ये ॥ शेषेणेत्यादिसमिद्द्वयंप्रक्षिप्यआघारांतेजुहुयात् ॥ भूःस्वाहाअग्नयइ० ॥ भुवःस्वाहावायवइ० ॥ स्वःस्वाहासूर्यायेदं० ॥ भूर्भुवस्वःस्वाहाप्रजापतयेदं० ॥ अग्नयेव्रतानुष्ठानफलसंपादनायस्वाहा ॥ अ ग्नयेव्रतानुष्ठानफलसंपादनायेदं० ॥ विश्वेभ्योदेवेभ्यःस्वाहाविश्वेभ्योदेवेभ्यइदं० ॥ एवंसप्ताहुतीर्हुत्वा स्विष्टकृदादिहोमशेषंसमाप्य ॥ अर्कशाखासमीपेगत्वा ॥ शाखांगृहेवानीयार्कविवाहःकार्यः ॥ तिथ्या

दिसंकीर्त्यअमुकगोत्रस्यामुकशर्मणोऔर्ध्वदेहिकाधिकारसिध्यर्थंअर्कविवाहंकरिष्ये ॥ इतिसंकल्प्य ॥ तदंगत्वेनमातृकापूजनपूर्वकंहिरण्यद्वारानांदीश्राद्धंकरिष्ये ॥ संकल्पंकृत्वा ॥ अर्कब्रह्मचारिणौहरिद्रयानुलिप्यपीतसूत्रेणवेष्टयवस्त्रयुग्मेनाच्छादयेत् ॥ततःउल्लेखनाद्याग्न्याधानांतेसमिद्द्वयमादायाघाघारांतमुक्त्वा ॥ अग्निंबृहस्पतिंविवाहविधियोजकंकामंअग्निंवायुंसूर्यंप्रजापतिंएताःअष्टौप्रधानदेवताःप्रत्येकमेकैकयाज्याहुत्यायक्ष्ये ॥ शेषेणेत्यादिआघारांतंकृत्वाप्रधानाज्याहुतीर्जुहुयात् ॥ ॐ अग्नयेस्वाहाअग्नय इ० ॥ बृहस्पतयेस्वाहाबृहस्पतयइ० ॥ विवाहविधियोजकायस्वाहा ॥ विवाहविधियोजकायेदं० ॥ यस्मैत्वंकामकामायवयंसंम्यकृयजामहे ॥ तमस्मभ्यंकामंदत्वाथेदंघृतंपिबस्वाहा ॥ कामायेदं ॥ व्याहृतिचतुष्टयं ॥ भूःस्वाहाअग्नयइ० भूवःस्वाहावायवइ० ॥ स्वःस्वाहासूर्याये० ॥ भूर्भुवस्वःस्वाहाप्रजापतयइ० ॥ इतिहुत्वा ॥ स्विष्टाकृदादिहोमंसमाप्य ॥ अर्कशाखांशवंचदहेत् ॥ शाखांप्रवाहयेत् ॥ ॥ इति ब्रह्मचारि मरण विधिः समाप्तः ॥ ॥ अथस्नातकमरणविधिप्रारंभः ॥ हरिहरः ॥ एवंस्नातकमृतावपिअर्कविवाहंकुर्यात् ॥ स्नातकोमृतकोब्रह्मचारीचनिधनंप्राप्नुयाद्यदि ॥ इत्यनेनस्नातकस्यअर्कविवाहोक्तेः ॥ तत्रसंकल्पप्रयोगः ॥ स्नातकोमृतिसंभावनायां ॥ तन्मरणोत्तरंवाअवकीर्णदोषनिमित्तंप्रायश्चित्तंकृत्वा ॥ आचम्यप्राणायामंकृत्वा ॥ तिथ्याद्युच्चार्यअमुकगोत्रस्यअमुकनाम्नोमृतस्य

स्नातकस्यम्रियमाणस्यस्नातकस्यवाअवकीर्णदोषनिकृत्यर्थंयथाशक्तिकृच्छ्रत्रयप्राजापत्यप्रायश्चित्त भू
तद्रव्यंगोनिष्क्रयप्रत्याम्नायद्वारायत्किश्चिदन्यप्रत्याम्नायद्वारावासद्यःसूतकांतेवाअहमाचरिष्ये ॥ ५ ॥ अ
र्कशाखासमीपेगत्वा ॥ शाखांगृहेवानीय ॥ अर्कविवाहःकार्यः ॥ तिथ्याद्युच्चार्य ॥ अमुकगोत्रस्यअ
मुकशर्मणःऔर्ध्वदेहिकअधिकारसिध्यर्थंअर्कविवाहंकरिष्ये ॥ ॥ इतिसंकल्प्य ॥ तदंगत्वेनमातृका
पूजापूर्वंहिरण्यदाननांदीश्राद्धंकरिष्ये ॥ संकल्पंकृत्वा ॥ अर्कस्नातकौहरिद्रयानुलिप्यपीतसूत्रेणवेष्ट्यव
स्त्रयुग्मेनाच्छादयेत् ॥ ततःउल्लेखनाद्यग्न्याधानांतेसमिद्द्वयमादायाघारांतमुक्त्वा ॥ अत्रप्रधानं ॥ अग्निंबृ
हस्पतिंविवाहविधियोजकंकामंअग्निंवायुंसूर्यंप्रजापतिंचएताःअष्टप्रधानदेवताःप्रत्येकमेकैकयाज्याहुत्या
यक्ष्ये ॥ शेषेणेत्यादिआघारांतंकृत्वाआज्यंजुहुयात् ॥ अग्नयेस्वाहाअग्नयइ० ॥ बृहस्पतयेस्वाहाबृह
स्पतयइ० ॥ विवाहविधियोजकायस्वाहाविवाहविधियोजकायेदं० ॥ यस्मैत्वंकामकामायवयंसम्यक्य
जामहे ॥ तमस्मभ्यंकामंदत्वाथेदंघृतंपिबस्वाहाकामायेदं० ॥ व्याहृतिचतुष्टयंहुत्वायथालिंगत्यागंकु
र्यात् ॥ स्विष्टकृदादिहोमशेषंसमाप्य ॥ अर्कशाखांशवंचदहेत् ॥ शाखांप्रवाहयेत् ॥ शवंविधिवद्दहे
त् ॥ ॥ इति स्नातकमरण विधिः समाप्तः ॥ ॥ छ ॥ ॥ छ ॥
श्रीगणेशायनमः ॥ ॥ अथरजस्वलामरणविधिप्रारंभः ॥ रजस्वलायाःशुद्धिकर्तातिथ्याद्युच्चार्य ॥

अमुकगोत्रायाःअमुकनाम्न्याः ॥ रजस्वलास्वेच्छायामरणजनितदोषपरिहारार्थंऔर्ध्वदेहिकयोग्यतासि
ध्यर्थंचचांद्रायणत्रयात्मकंप्रायश्चित्तंप्रतिचांद्रायणंप्रत्याम्नायगोनिष्क्रयद्दाराकृच्छ्रैकमित्यष्टकृच्छ्रावकल्प
लेकृच्छ्रत्रयानुकल्पेनवाचांद्रायणत्रयस्यद्रव्यंदद्यात्॥तत्कालाचरणासंभवेसूतकांतेवादद्यात् ॥ततःकर्ता
ब्राह्मणवचनाच्चांद्रायणप्रायश्चित्तस्यसंपन्नतांसंपाद्य ॥ यवपिष्टेनप्रेतमनुलिप्यस्वयंस्नात्वा ॥ शूर्पेण
अष्टोत्तरशतवारंस्नापयेत् ॥ प्रेतंप्रक्षाल्यभस्मगोमयमृत्तिकाकुशोदकपंचगव्यशुद्धोदकैःस्नापयि
त्वा ॥ तथापावमानीभिर्यदंतियच्चदूरकेआपोहिष्ठेतितिसृभिः कयानइतितिसृभिःस्नापयित्वावस्त्रंपरि
त्यज्यविधिनादहेत् ॥ यद्दामलंप्रक्षाल्यस्नापयित्वाकाष्ठवद्दग्ध्वाविधिनादहेदितिभट्टाः ॥ इतिरजस्वला
मरणविधिःसमाप्तः ॥ ॥ छ ॥ श्रीगणेशायनमः ॥ ॥ अथगर्भिणीमरणविधिप्रारंभः ॥ मद
नरत्नेशौनकः ॥ षण्मासोत्तरंगर्भिण्यांमृतायांभर्तादिजलैःगोमूत्रेणआपोहिष्ठादिभिर्मंत्रैःप्रतिमंत्रंशवं
प्रोक्ष्य ॥ स्मशानेनीत्वानाभेरधः सव्यमुदरंचतुरंगुलंछित्वापुत्रमादायजीवंश्चेद्यस्तेस्तनइत्यृचास्तनंद
त्वा ॥ शिशुंग्रामेप्रापयेत् ॥ ततःसूत्रग्रथनेनोदरमव्रणंकृत्वा ॥ पृषदाज्येनचापूर्यमृद्भस्मकुशगोमूत्रैरा
पोहिष्ठादिभिःत्रिभिःसंस्नाप्य ॥वासोभिःप्रेतमाच्छाद्यशवधर्मेणदाहयेदिति ॥ यदिगर्भश्चेदप्राणस्तंनिख
नेत् ॥ इतिशौनकीयकल्पोक्तगर्भिणीमरणविधिः ॥ अथप्रयोगरत्नोक्तगृह्यकारिकानुसारीयुज्यते ॥ ग

र्भिण्यांसशल्यांमृतायांकर्त्ताकुक्षिंभित्वाशल्यंजीवतिचेत्तूनिजगृहेप्रापयित्वा ॥ प्रमीतंनिखायशल्यसहि
तमरणदोषनिवृत्तयेत्रयस्त्रिंशत्कृच्छ्रात्मकप्रायश्चित्तंकुर्यात् ॥ कृच्छ्रद्वयमप्युक्तंप्रायश्चित्तमतेहेमाद्रौ ॥ छे
त्तुस्तप्तकृच्छ्रंचरेत् ॥ अपितत्रैव ॥ अथैतत्प्रयोगः भर्तादिःकर्तातिथ्याद्युच्चार्य ॥ अमुकगोत्रायाःअमु
कनाम्न्याःगर्भिण्याः सशल्यमरणदोषनिवृत्यर्थंत्रयस्त्रिंशत्कृच्छ्रात्मकंप्रायश्चित्तंप्रतिकृच्छ्रंगोनिष्क्रयाद्यन्य
तमद्वारासद्यःसूतकांतेवाअहमाचरिष्ये ॥ इतिसंकल्प्य ॥ विधिनादहेत् ॥ यदिगर्भंदहनंकृतंतदाकर्ता
सगर्भदहनजन्यदोषपरिहारार्थंसंपादकप्रायश्चित्तंकुर्यात् ॥ प्रायश्चित्तंतुगर्भवधप्रयुक्तातिदेशकंकार्यं ॥
तदुक्तंमिताक्षरायांस्मृत्यर्थसारेच ॥ ब्राह्मणगर्भवधेब्रह्महत्याव्रतं ॥ क्षत्रियगर्भवधेक्षत्रहत्याव्रतं ॥ एव
मन्यत्रापीति ॥ सर्वत्रादितिदेशिकप्रायश्चित्तेषुपादोनंप्रायश्चित्तं ॥ इत्यपितत्रैव ॥ अत्रायंप्रयोगवाक्यं
तिथ्याद्युच्चार्यममब्रह्मवधदोष निवृत्तिद्वाराआत्मशुद्धिसंपादकंप्रायश्चित्तंप्रतिकृच्छ्रंगोनिष्क्रयाद्यन्यतमप्र
त्याम्नायद्वारासद्यःसूतकांतेवाहमाचरिष्ये ॥ इतिसंकल्प्य ॥ क्षत्रगर्भेक्षत्रपदमूह्यंयद्यपिस्त्रीपुन्नपुंसक
ज्ञानाभावस्तथापिगर्भदहनेइदंप्रायश्चित्तंकार्यं ॥ एवमात्मशुद्ध्यर्थंकृतेगर्भिण्याअपिसगर्भदहनदोषनि
वृत्त्यर्थं और्ध्वदेहिके अधिकारसिध्यर्थंचत्र्यब्दंप्रायश्चित्तंकार्यं ॥ अत्रब्रह्मचारिविधानप्रभृतिएतदंतविधि
नामूलाभिप्रायःप्रयोगरत्ननिर्णयसिंध्वादौद्रष्टव्यः ॥ गर्भिणीमरणेयद्विधिरुक्तस्तत्सर्वोपिषण्मासोर्ध्वंज्ञेयः

षण्मासोर्ध्वमित्यत्रमूलंप्रायश्चित्तहेमाद्रिरिति ॥ ॥ इतिगर्भिणीमरणविधिःसमाप्तः ॥ अथप्रसूतिकामरणविधिप्रारंभः ॥ ॥ देशकालौसंकीर्त्यामुकगोत्रायाःअमुकनाम्न्याः प्रसूतिकावस्थामरणजन्यप्रत्यवायपरिहारार्थं और्ध्वदेहिकेयोग्यत्वार्थंचगोनिष्क्रयाद्यन्यतमप्रत्याम्नायत्वेनकृच्छ्रैकमितिकृच्छ्रत्रयात्मकचांद्रायणत्रयप्रायश्चित्तपूर्वकंशूर्पेणशतस्नानानिकरिष्ये ॥ इतिसंकल्प्य ॥ स्वयंस्नात्वा ॥ शूर्पोदकेनअष्टोत्तरशतवारंस्नापयित्वा ॥ कुंभेजलमादायपंचगव्यंतत्रक्षिप्त्वा ॥ आपोहिष्ठीयवामदेव्यवारुणापुण्यऋग्भिरभिमंत्र्यपावमानीयदेति ॥ आपोहिष्ठेतितिसृभिःसंस्नाप्य ॥ विधिनादहेत् ॥ सूतिकावस्थायांमरणेतत्रादनोभेदेनप्रायश्चित्तमुक्तंनिर्णये० ॥ तच्चप्रथमेत्र्यब्दंद्वितीयेब्दद्वयंतृतीयेअब्दं ॥ तदूर्ध्वंमासपर्यंतंकृच्छ्रत्रयमिति ॥ प्रयोगरत्नेतुदशाहादुत्तरंयावन्मासकृच्छ्रत्रयमिति ॥ असूतकीशवंसंस्पृश्यशूर्पेशतंक्षिपेदितिनिर्णयसिंधौ ॥ इतिसूतिकामरणविधिःसमाप्तः ॥ ॥ अथसहगमनविधिप्रारंभः ॥ ॥ अथसहगमनविधिप्रारंभः ॥ पितुःपुत्रेणपैतृमेधिकसंकल्पादिवाअग्निदानांतेकृतेपत्नीआचम्यप्राणानायम्यदेशकालौसंकीर्त्य अरुंधतीसमाचारत्वस्वर्गलोकमहीयमानत्वमनुष्यलोकसंख्यादावच्छिन्नस्वर्गवासभर्तृसहितचतुर्दशेंद्रावच्छिन्नकालिकक्रीडयानत्वमातृपितृश्वशुरकुलत्रयेपूतत्वंब्रह्मघ्न मित्रघ्नपूतत्वपुत्राद्यवियोगकामासहगमनविधिंकरिष्ये ॥ तदंगभर्तृचितारोहणंकरिष्ये ॥ इतिसंकल्प्य ॥ श्रील

क्ष्मीनारायणप्रीतिद्वारासहगमनेअतिशयसात्विकबुद्धिप्राप्त्यर्थंहरिद्राकुंकुमांजनसौभाग्यद्रव्ययुतानिपंच त्रीणिवावंशपात्रदानानिकरिष्ये ॥ इतिसंकल्प्यदानार्थंपात्रंदत्वाप्रतिज्ञायसंपूज्य ॥ श्रीलक्ष्मीनारायणो देवोबलसत्वगुणाश्रयः ॥ गाढंसत्वंचमेदेयाद्दस्पनैःपरितोषितः ॥ सोपस्कराणिशूर्पाणिवायनैःसंयुतानिच ॥ लक्ष्मीनारायणप्रीत्यैसत्वकामाददाम्यहं ॥ २ ॥ इतिमंत्रमुच्चार्य ॥ इदंसौभाग्यद्रव्ययुतंवंशपात्रंलक्ष्मीनारायणप्रीत्यैअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ इतिदत्वा ॥ अनेनसोपस्करशूर्पदानेन लक्ष्मीनारायणौप्रियेतामित्युत्क्कासमंत्रंसप्तपंचत्रीणिवासोपस्कराणिदद्यात् ॥ ततःपल्लवेपंचरत्नानिनीलांजनंचबध्वामुखेमुक्ताफलंन्यस्याग्नेःसमीपंगत्वा ॥ स्वाहासंश्लेषनिर्विण्णशार्वगोत्रहुताशन ॥ सत्वमार्गप्रदानेननयमांपत्युरंतिकमित्यग्निंप्रार्थ्यआज्येवाग्नौजुहुयात् ॥ अग्नयेतेजाधिपतयेस्वाहाअग्नेतेजाधिपतयइदं० ॥ १ ॥ विष्णमेसमधिपतयेस्वाहा ॥ विष्णवेसत्वाधिपतयइदंन० ॥ २ ॥ कालायधर्माधिपतयेस्वाहाकालायधर्माधिपतयइदं० ॥ ३ ॥ पृथिव्यैलोकाधिष्ठात्र्यैस्वाहापृथ्व्यैलोकाधिष्ठात्र्यैइदं० ॥ ४ ॥ अभ्द्योरसाधिष्ठात्रीभ्यःस्वाहाअभ्द्योरसाधिष्ठात्रीभ्यइदं० ॥ ५ ॥ वायवेबलाधिपतयेस्वाहावायवेबलाधिपतयइदं० ॥ ६ ॥ आकाशायसर्वाधिपतयेस्वाहाआकाशाय सर्वाधिपतयेदं० ॥ ७ ॥ कालायधर्माधिष्ठात्रेस्वाहाकालायधर्माधिष्ठात्रेइदं० ॥ ८ ॥ अभ्द्यःसर्वसाक्षिभ्यस्वाहासर्वसाक्षिभ्यइदं० ॥ ९ ॥

ब्रह्मणेवेदाधिपतयेस्वाहाब्रह्मणेवेदाधिपतयइदं०॥ १० ॥ रुद्रायस्मशानाधिपतयेस्वाहारुद्रायस्मशानाधिपतयेदं०॥ ११॥ एत्येकादशाज्याहुतीर्हुत्वा॥ पुत्रादिरग्निदानंकुर्यात् ॥ ततःसहगमनकर्त्रीप्रदक्षिणीकृत्य दृषदुपलंसंपूज्यचितामारुह्यफलपुष्पांजालिंगृहीत्वा ॥ त्वमेवसर्वभूतानामंतश्चरसिसाक्षिवत् ॥ त्वमेवदेव जानीषेनविदुर्यानिमानुषाः ॥ अनुगच्छाभिभर्तारंनयमांपत्युरंतिकमितिमंत्रद्वयमुच्चार्यनिर्हुताशनंनप्रविशेत् ॥ अनधिकारात्मंत्रोच्चारणेप्यधिकाराभावात् ॥ पुत्रादिनाविधिवदग्निदानंकृत्वातूष्णींप्रज्वलयेदितियुक्तंप्रतिभातिभर्तुर्वामांगेशयीतेतिदेवराजदेवीये ॥ ॥ स्वयंकुटिप्रज्वलंनदद्युः ॥ इतिसंक्षेप अंत्येष्टिप्रयोगनारायणभट्टीकृतेसाकलितःसमाप्तः ॥ ॥ श्रीमहाविष्णुःप्रीयतां ॥ छ ॥

हें पुस्तक रा० रा० रंगोविनायक जामखेडकर व पुरुषोत्तम गणपत दास सुगंधी यांणीं छापून प्रसिद्ध केलें.


तारीख १७ माहे मार्च सन १८८५ इसवी.

शके १८०७ पार्थिव नाम संवत्सरे चैत्र शुद्ध १ भौमवार.

(आवृत्ती १ ली.)

मुंबईत, गोपाळ नारायण आणि कंपनी यांचे छा० छा०

॥ इति समंत्रक अंत्येष्टि प्रयोग समाप्तः ॥



पूर्व

चरक्यै ५५ ईशानाय ५१	स्कंदाय० ५० इंद्राय० ५४	विदार्यै ४८ अग्नये ५५

	शिखिने नमः १	पर्जन्याय नमः २	जयंताय नमः ३	कुलिशायुधाय ४	सूर्याय नः ५	सत्याय नमः ६	भृशाय नमः ७	आकाशाय नः ८	वायवे नः ९	
	दितये ३२	अद्भ्यः ३३	३	४	५	६	७	सावित्र्याय ३४	पूष्णे १०	
	अदितये ३१	३१	आपवत्साय ४४	३७	अर्यम्णे नमः ३७	३७	सवित्रे ३८	११	वितथाय ११	
	सर्पेभ्यो ३०	३०	४३	४५	४५	४५	३९	१२	गृहक्षताय नः १२	
पिलिपिच्छाय ५२ सोमाय ६०	सोमाय २९	२९	पृथ्वीधराय ४३	४५	ब्रह्मणे ४५	४५	विवस्वताय नः ३९	१३	यमाय १३	यमाय ५६ अर्यम्णे ५१
	भल्लाटाय २८	२८	४३	४५	४५	४५	३९	१४	गंधर्वा १४	
	मुख्याय नमः २७	२७	राजयक्ष्मणे ४२	४१	मित्राय ४१	४१	विबुधा ४०	१५	भृंगराजाय नः १५	
	अहये २६	रुद्राय ३६	२३	२२	२१	२०	१९	विजयाय नमः ३५	मृगाय १६	
	रोगाय २५	पापाय २४	शोषाय २३	असुराय २२	वरुणाय २१	पुष्पदंताय २०	सुग्रीवाय १९	दौवारिकाय १८	पितृभ्यः १७	

वायवे ५९ पापराक्षस्यै ५९	वास्तुशांतीचें ग्रहमंडल	निर्ऋतये ५७ पूतनायै ५८

॥ अथ वास्तुशांति देवता मंडल प्रारंभः ॥

हें पुस्तक रा० रा० रंगोविनायक जामखेडकर व पुरुषोत्तम गणपत दास सुगंधी यांणीं छापून प्रसिद्ध केलें.

तारीख १७ माहे मार्च सन १८८५ इसवी.

शके १८०७ पार्थिव नाम संवत्सरे चैत्र शुद्ध १ भौमवार.

(आवृत्ती १ ली.)

मुंबईत, गोपाळ नारायण आणि कंपनी यांचे छा० छा०


दत्तात्रेय.


गणपती:
विष्णु:
शंकर:
देवी
सूर्य: